5120
CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

BIBLIOTHEC INDICA:
A COLLECTION OF ... RIENTAL WORKS
...SHED BY THE
...OCIETY OF BENGAL.
NEW SERIES, NO. 1444

ASIA... योगशास्त्रम् ।

स्वोपज्ञविवरणसहितम् ।



THE YOGAŚASTRA,

With the commentary called
SVOPAJNAVIVARANA.

BY

ŚRĪ HEMACHANDRĀCHĀRYA.

EDITED BY

CĀSTRA VICĀRADA JAINĀCARYA

CRĪ VIJAYA DHARMA SŪRI.

FASCICULUS VI.

Calcutta:
PRINTED BY BISHNU PADA HAZRA, AT THE SANSKRIT PRESS
No. 124-2-1 Manicktolla Street,
AND PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL, 1, PARK STREET.
1921.

CC-0. Agamnigam Digital Pres

LIST OF B

AT THE

ASIATIC SOC

No. 1, PARK STREET

AND OBTAINABLE FRO

THE SOCIETY'S AGEN

LUZAC & CO., 46, GREAT RUSSELL STREET,

M. PAUL GEUTHNER, 13, RUE JACOB, PARIS,

*Complete copies of those works marked with an asterisk * cannot be suppl of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

	Rs.	A
Asva-vaidyaka, Fasc. 1-5 @ /10/ each	3	
Advaitachintā Kaustubha, Fasc. 1-4 @ /10/ each	2	
*Agni Purana (Text), Fasc. 4--14 @ /10/ each	6	1
*Aitereya Aranyaka of the Rig-Veda (Text), 2--4 @ /10/ each	1	14
*Aitareya Brāhmaṇa, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-5 ; Vol. III. Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each	14	6
Aitareya Alochanum.	2	0
Amarkosh, Fasc. 1—2	4	0
*Anu Bhasyam, (Text), Fasc. 2-5 @ /10/ each	2	8
Anuman Didhiti Prasarini, Fasc. 1--3 @ /10/-	1	14
Aphorisms of Sandilya (English), Fasc. 1 @ 1/-	1	0
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each	3	12
Atharvana Upanishadas (Text), Fasc. 2--5 @ /10/ each	2	8
Atmatattvaviveka or Bauddhadhikara, In progress Fasc. 1--3 @ /10/ each ...	1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-13 ; Vol. II. Fasc. 1-11 @ 1/ each	24	0
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol II, Fasc. 1 @ /10/ each	1	14
Bauddhastotrasangraha	2	0
Baudhāyana S'rauta Sūtra, Fasc. 1-3; Vol. II, Fasc 1-5 ; Vol. III, Fasc. 1-3 @ /10/ each	6	14
Bhamati (Text), Fasc. 5--8, @ /10/ each	2	8
Bhāsavritty Fasc. I in progress	0	10
Bhaṭṭa Dipikā Vol. I, Fasc. 1-6 : Vol. 2, Fasc. 1--2, @ /10 each ...	5	0
Bodhicaryāvatāra of Çāntideva, Fasc. 1-7 @ /10/ each	4	6
Brahma Sutras (English), Fasc. 1, @ 1/-	1	0
Bṛihaddēvatā, Fasc. 1-4 @ /10/ each	2	8
Brihaddharma Purāṇa Fasc 1-6 @ /10/ each	3	12
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each	1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each	8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7 ; Vol II, Fasc. I-5 ; Vol. III, Fasc. 1-7 ; Vol. V, Fasc. 1-4 @ /10/ each	14	6
Ditto Vol. VI, Fasc. 1-3 @ 1/4/ each	3	12
Ditto Vol. VII, Fasc. 1-5 @ /10/	3	2
Ditto Vol. IX. Fasc. 1-2	1	4
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1--18, Part II, Fasc. 1, @ /10/ each...	11	14
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 4-25 ; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10 ; Vol. IV, Fasc. 1-6 @ /10/ each ...	35	0
Ditto Vol. IV, Fasc. 7, @ 1/4/ each	1	4
Ditto Vol. IV, Fasc. 8-10 @ /10/	1	14
Çlockavartika, (English) Fasc. 1-7 @ 1/4/ each	8	12
*Crauta Sutra of Apastamba (Text), Fasc. 6--17, @ /10/ each	7	8
*Çrauta Sūtra of Çānkhāyana, Vol. I. Fasc. 1-7 ; Vol. II, Fasc. 1-4 ; Vol. III, Fasc. 1-4 ; Vol 4, Fasc. 1 @ /10/ each	10	0
Çrī Bhāshyam (Text), Fasc. 1-3 @ /10/ each	1	14
Cri Cantinatha Charita, Fasc. 1-4 @ /10/ each	2	8

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

BIBLIOTHECA INDICA:

A COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES NO. 1444

योगशास्त्रम् ।

स्वोपज्ञविवरणसहितम् ।

THE YOGAŚASTRA,

With the commentary called
SVOPAJNAVIVARANA.

BY

ŚRĪ HEMACHANDRĀCHĀRYA.

EDITED BY

CĀSTRA VICĀRADA JAINĀCARYA
CRĪ VIJAYA DHARMA SŪRI.

FASCICULUS VI.

Calcutta:

PRINTED BY BISHNU PADA HAZRA, AT THE SANSKRIT PRESS
No. 124-2-1 Manicktolla Street,
AND PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL, 1, PARK STREET.
1921.

State Museum Library, Lucknow
5120

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जलस्खलनार्थं पालीबन्धः, तेन प्रतिपक्षभूतेन संतोषेण लोभकषायं निरुन्ध्यादिति भावः ।

अत्रान्तरश्लोकाः—

यथा नृणां चक्रवर्त्ती सुराणां पाकशासनः ।
तथा गुणानां सर्वेषां संतोषः प्रवरो गुणः ॥ १ ॥
संतोषयुक्तस्य यतेरसंतुष्टस्य चक्रिणः ।
तुलया संमितो मन्ये प्रकर्षः सुखदुःखयोः ॥ २ ॥
स्वाधीनं राज्यमुत्सृज्य संतोषामृततृष्णया ।
निस्सङ्गत्वं प्रपद्यन्ते तत्क्षणाच्चक्रवर्त्तिनः ॥ ३ ॥
निवृत्तायां धनेच्छायां पार्श्वस्था एव संपदः ।
अङ्गुल्या पिहिते कर्णे शब्दाद्वैतं विजृम्भते ॥ ४ ॥
संतोषसिद्धौ संसिद्धाः प्रतिवस्तु विरक्तयः ।
अक्ष्णोः पिधाने पिहितं ननु विश्वं चराचरम् ॥ ५ ॥
किमिन्द्रियाणां दमनैः किं कायपरिपीडनैः ? ।
ननु संतोषमात्रेण मुक्तिश्रीसुखमीक्षते ॥ ६ ॥
जीवन्तोऽपि विमुक्तास्ते ये मुक्तिसुखशालिनः ।
किंवा विमुक्तेः शिरसि शृङ्गं किमपि वर्त्तते ? ॥ ७ ॥
किं रागद्वेषसंकीर्णं किंवा विषयसंभवम् ।
येन संतोषजं सौख्यं हीयेत शिवसौख्यतः ? ॥ ८ ॥
परप्रत्यायनासारैः किंवा शास्त्रसुभाषितैः ? ।
मीलिताक्षा विमृशन्तु संतोषास्वादजं सुखम् ॥ ९ ॥
चेत् कारणानुकारीणि कार्याणि प्रतिपद्यसे ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संतोषानन्दजन्मा तन्मोक्षानन्दः प्रतीयताम् ॥ १० ॥
ननु तीव्रं तपःकर्म कर्मनिर्मूलनं जगुः ।
सत्यं तदपि संतोषरहितं विफलं विदुः ॥ ११ ॥
कृषिसेवापाशुपाल्यवाणिज्यैः किं सुखार्थिनाम् ।
ननु संतोषपानात् किं नात्मा निर्वृतिमाप्यते ? ॥ १२ ॥
यत् संतोषवतां सौख्यं तृणसंस्तरशायिनाम् ।
क्व तत् संतोषवन्ध्यानां तूलिकाशायिनामपि ॥ १३ ॥
असंतुष्टास्तृणायन्ते धनिनोऽपीशिनां पुरः ।
ईशिनोऽपि तृणायन्ते संतुष्टानां पुरःस्थिताः ॥ १४ ॥
आयासमात्रं नश्वर्यचक्रिशक्रादिसंपदः ।
अनायासं च नित्यं च सुखं संतोषसंभवम् ॥ १५ ॥
इति प्रत्यादेष्टुं निखिलमपि लोभस्य ललितं
मयोक्तः संतोषः परमसुखसाम्राज्यसुभगः ।
कुरुध्वं लोभाग्निप्रसरपरितापं शमयितुं
तदस्मिन् संतोषामृतरसमये वेश्मनि रतिम् ॥१६॥२२॥

एवं च—इत्यनेन वक्ष्यमाणसंग्रहश्लोकस्यावसरमाह—

क्षान्त्या क्रोधो मृदुत्वेन मानो मायार्जवेन च ।
लोभश्चानीहया जेयाः कषाया इति संग्रहः ॥२३॥

पूर्वोक्तस्यार्थस्य संग्रहणात् संग्रहः ॥ २३ ॥

यद्यपि तुल्ययोगितया कषायेन्द्रियजयौ मोक्षरूपत्वेनोक्तौ, तथाप्यनयोः कषायजयः प्रधानम्, तद्धेतुस्तु इन्द्रियजयः, तदेवाह—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विनेन्द्रियजयं नैव कषायाञ्जेतुमीश्वरः ।
हन्यते हैमनं जाड्यं न विना ज्वलितानलम् ॥२४॥

समकालसंभविनोरपि कषायजयेन्द्रियजययोः प्रदीपप्रकाशयोरिवास्ति कार्यकारणभावः ; अत उक्तम्—इन्द्रियजयं विना न कषायजयः । हन्यते इत्यादिना दृष्टान्तः । हैमनजाड्यसदृशाः कषायाः, ज्वलितानलप्रायश्चेन्द्रियजयः । हैमन्ते भवं हैमनम्, हेमन्ताद् वा तलुक् च ॥६।३।९१॥ इत्यनेनाणि तलोपे वृद्धौ च सिद्धम् ॥ २४ ॥

इन्द्रियजयः कषायजयहेतुत्वेनोक्तः, अजितानां त्विन्द्रियाणां न कषायजयहेतुत्वं प्रत्युतापायहेतुत्वमेवेत्याह—

अदान्तैरिन्द्रियहयैश्चलैरपथगामिभिः ।
आकृष्य नरकारण्ये जन्तुः सपदि नीयते ॥२५॥

इन्द्रियाण्येव हया अश्वा इन्द्रियहयास्तैश्चलैरेकत्रानवस्थायिभिः प्रकृत्या, अदान्तैरजितैः सद्भिरपथगामिभिरुन्मार्गचारिभिराकृष्य बलात्कारेण कृष्ट्वा जन्तुः प्राणी, नरक एवारण्यं विविधभीतिहेतुत्वाद् नरकारण्यं तस्मिन् सपदि तत्क्षणाद् नीयते । यथाऽदान्तो हयोऽपथगामित्वेन स्वमारोहकमरण्ये नयति तथैवाजितैरिन्द्रियैर्जन्तुर्विविधापायबहुले नरके नीयत इत्यर्थः ॥२५॥

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कथमजितानीन्द्रियाणि नरकं नयन्तीत्याह—

इन्द्रियैर्विजितो जन्तुः कषायैरभिभूयते ।
वीरैः कृष्टेष्टकः पूर्वं वप्रः कैः कैर्न खण्ड्यते ? ॥२६॥

इन्द्रियाणि जेतुमशक्तोऽत एव तैर्विजितः, यान् जेतुमिन्द्रियजय उपदिश्यते तैरेव प्रत्युत कषायैरभिभूयते । कषायाभिभूतश्च नरकं यातीति सुप्रसिद्धमेव । ननु यदीन्द्रियजयेऽशक्तो जन्तुः, तर्हीन्द्रियजनितैव बाधास्तु, कोऽवसरः कषायबाधायाः ? इत्याशङ्कामपनेतुं दृष्टान्तमाह—वीरैर्विक्रान्तैः कृष्टा इष्टका यस्मात् स कृष्टेष्टकः वप्रः प्राकारः पूर्वं प्रथमम्, पश्चात् कैः कैरवीरैरपि एकैकेष्टकाशकलकर्षणेन न खण्ड्यते न खण्डशो नीयते ? । अयमर्थः—यथा वीरपुरुषपातितच्छिद्रः प्राकारः कर्मकरप्रायाणामपि गम्यो भवति तथैव वप्रप्रायः प्राणी वीरप्रायैरिन्द्रियैर्भग्नप्राय इतरपुरुषप्रायैः कषायैर्बाध्यते, इन्द्रियानुसारित्वात् कषायाणाम् ॥ २६ ॥

न केवलमनिर्जितैरिन्द्रियैः कषायाभिभूतो जन्तुर्नरके नीयते, यावदिहलोकेऽपि अनिर्जितानीन्द्रियाण्यपायकारणान्येवेत्याह—

कुलघाताय पाताय बन्धाय च वधाय च ।
अनिर्जितानि जायन्ते करणानि शरीरिणाम् ॥२७॥

शरीरिणां जन्तूनां करणानीन्द्रियाणि अनिर्जितानि अदान्तानि जायन्ते । कस्मै ? । कुलघाताय कुलघातो वंशोच्छेदः,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पाताय पातो राज्यादिभ्रंशः, बन्धाय बन्धो नियमनम्, वधाय वधः प्राणनिग्रहः । तत्र कुलघातायेन्द्रियाणि रावणस्येव । तस्य निर्जितेन्द्रियस्य परदारान् रिरंसमानस्य रामलक्ष्मणाभ्यां कुल-क्षयः कृत इत्युक्तपूर्वम् । पातायेन्द्रियाणि सौदासस्येव । स हि राज्यं पालयन् मांसप्रियतया नानाविधैर्मांसैरात्मानं प्रीणयन्नेकदा सूपकारैः संस्कृते मांसे बिडालादिभिर्भक्षिते सति तस्मिन् दिने धार्मिकैः श्रावकजनै राजानं प्रसाद्यामारिपटहे दापिते जीववधा-भावादन्यमांसाप्राप्तौ सुलभस्य कस्यचिड्डिम्भस्य मांसं परिवेष्य राजा परितोषितः । स चैकान्ते सूपकारान् शपथदानपूर्वकं पप्रच्छ । तैश्च यथास्थिते कथिते मानुषमांसगृद्ध्या सकलनगरे डिम्भमानुषग्रहणाय स्वपुरुषान् नियुक्तवान् । एतच्च ज्ञात्वा पौरजानपदैर्मन्त्रिभिश्च भीतभीतैरेकमतीभूय मद्यपानप्रमत्तो बद्ध्वाऽरण्ये विमुक्तः । स च राज्यात्, कुलात् परिवाराच्च पतितो-ऽरण्ये श्वापद इव दुःखमनुबभूव । बन्धायेन्द्रियाणि चण्डप्रद्योत-स्येव । वधाय मृत्यवे इन्द्रियाणि रावणस्येवेत्युक्तपूर्वम् ।

अत्रान्तरश्लोकाः—

इन्द्रियैः स्वार्थविवशैः कस्को नैव विडम्ब्यते ।
अपि विज्ञातशास्त्रार्था[1]श्चेष्टन्ते बालका इव ॥ १ ॥

---

(१) ख घ -र्थाश्चोद्यन्ते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

किमतोऽपि घृणास्थानमिन्द्रियाणां प्रकाश्यते ।
यद् बन्धौ बाहुबलिनि भरतोऽप्यस्त्रमक्षिपत् ॥ २ ॥
जयो यद् बाहुबलिनि भरते च पराजयः ।
जिताजितानां तत् सर्वमिन्द्रियाणां विजृम्भितम् ॥ ३ ॥
यच्छस्त्राशस्त्रि युध्यन्ते चरमेऽपि भवे स्थिताः ।
दुरन्तानामिन्द्रियाणां महिम्नानेन लज्जिताः ॥ ४ ॥
दण्डान्तां चण्डचरितैरिन्द्रियैः पशवो जनाः ।
शान्तमोहाः पूर्वविदो दण्ड्यन्ते यत् तदद्भुतम् ॥ ५ ॥
जिता हृषीकैरत्यन्तं देवदानवमानवाः ।
जुगुप्सितानि कर्माणि ह्री ! तन्वन्ति तपस्विनः ॥ ६ ॥
अखाद्यान्यपि खादन्त्यपेयान्यपि पिबन्ति च ।
अगम्यान्यपि गच्छन्ति हृषीकवशगा नराः ॥ ७ ॥
वेश्यानां नीचकर्माणि दास्यान्यपि च कुर्वते ।
कुलशीलोज्झितास्त्यक्तकरुणैः करणैर्हताः ॥ ८ ॥
परद्रव्ये परस्त्रीषु मोहान्धमनसां नृणाम् ।
या प्रवृत्तिः सेन्द्रियाणामतन्त्राणां विजृम्भितम् ॥ ९ ॥
पाणिपादेन्द्रियच्छेदमरणानि शरीरिभिः ।
प्राप्यन्ते यद्वशात् तेभ्यः करणेभ्यो नमो नमः ॥ १० ॥
विनयं ग्राहयन्त्यन्यान् ये स्वयं करणैर्जिताः ।
पिधाय पाणिना वक्त्रं तान् हसन्ति विवेकिनः ॥ ११ ॥
आ विरिञ्चादा च कीटाद् ये केचिदिह जन्तवः ।
विमुच्यैकं वीतरागं ते सर्वेऽपीन्द्रियैर्जिताः ॥ १२ ॥ २७ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं सामान्येनेन्द्रियदोषानभिधाय स्पर्शनादीन्द्रियाणां श्लोकपञ्चकेन दोषानाह—

वशास्पर्शसुखास्वादप्रसारितकरः करी ।
आलानबन्धनक्लेशमासादयति तत्क्षणात् ॥२८॥
पयस्यगाधे विचरन् गिलन् गलगतामिषम् ।
मैनिकस्य करे दीनो मीनः पतति निश्चितम्॥२९॥
निपतन् मत्तमातङ्गकपोले गन्धलोलुपः ।
कर्णताललताघाताद् मृत्युमाप्नोति षट्पदः ॥३०॥
कनकच्छेदसंकाशशिखालोकविमोहितः ।
रभसेन पतन् दीपे शलभो लभते मृतिम् ॥ ३१ ॥
हरिणो हारिणीं गीतिमाकर्णयितुमुद्धुरः ।
आकर्णाकृष्टचापस्य याति व्याधस्य वेध्यताम्॥३२॥

स्पष्टाः नवरं वशा हस्तिनी, गलो रज्जुबद्धो लोहकण्टकः, मीनान् हन्तीति मैनिको धीवरः, कर्णताल एव तलस्चपेटस्तेनाघातः, गीतिर्गीतम् ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

उपसंहरति—

एवं विषय एकैकः पञ्चत्वाय निषेवितः ।
कथं हि युगपत् पञ्च पञ्चत्वाय भवन्ति न ? ॥३३॥

विषय इन्द्रियस्य गोचरः इन्द्रियप्रकरणेऽपि यद् विषयस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दोषदर्शनम्, तद् विषयद्वारेणैवेन्द्रियाणां दोषजनकत्वमिति दर्शनार्थम्। एकैको विषयो गजादीनां पञ्चत्वाय मरणाय। यस्तु पुमान् सर्वेषु विषयेष्वासक्तस्तं प्रत्याह—कथं हि युगपत् पञ्चापि विषयाः सेविताः पञ्चत्वाय न भवन्ति ?—अपि तु भवन्त्येवेति। यदाह—

पञ्चसु सक्ताः पञ्च विनष्टा यत्रागृहीतपरमार्थाः।
एकः पञ्चसु सक्तः प्रयाति भस्मान्ततां मूढः ॥ १ ॥ ३३ ॥

इन्द्रियदोषानभिधाय तज्जयोपदेशमाह—

तदिन्द्रियजयं कुर्याद् मनःशुद्ध्या महामतिः।
यां विना यमनियमैः कायक्लेशो वृथा नृणाम् ॥३४॥

यस्मादेवंविधानर्थसार्थसमर्थकानीन्द्रियाणि तत् तस्मादिन्द्रियाणां भावेन्द्रियाणां जयं कुर्यात्। द्विविधानि हीन्द्रियाणि, द्रव्येन्द्रियाणि भावेन्द्रियाणि च। तत्र द्रव्येन्द्रियाणि स्पर्शनेन्द्रियाद्याकारपरिणतानि पुद्गलद्रव्याणि, भावेन्द्रियाणि स्पर्शादिष्वभिलाषोपायरूपाणि तेषां जयो लौल्यपरिहारेणावस्थानम्।

अत्रान्तरश्लोकाः—

अनिर्जितेन्द्रियग्रामो यतो दुःखैः प्रबाध्यते।
तस्माज्जयेदिन्द्रियाणि सर्वदुःखविमुक्तये ॥ १ ॥
न चेन्द्रियाणां विजयः सर्वथैवाप्रवर्त्तनम्।
रागद्वेषविमुक्त्या तु प्रवृत्तिरपि तज्जयः ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अशक्यो विषयोऽस्प्रष्टुमिन्द्रियैः स्वसमीपगः ।
रागद्वेषौ पुनस्तत्र मतिमान् परिवर्जयेत् ॥ ३ ॥
हताहतानीन्द्रियाणि सदा संयमयोगिनाम् ।
अहतानि हितार्थेषु हतान्यहितवस्तुषु ॥ ४ ॥
जितान्यक्षाणि मोक्षाय संसारायाऽजितानि तु ।
तदेतदन्तरं ज्ञात्वा यद् युक्तं तत् समाचर ॥ ५ ॥
स्पर्शे मृदौ च तूल्यादेरुपलादेश्च कर्कशे ।
भव रत्यरती हित्वा जेता स्पर्शनमिन्द्रियम् ॥ ६ ॥
रसे स्वादौ च भक्ष्यादेरितरस्मिन्नथापि वा ।
प्रीत्यप्रीती विमुच्योच्चैर्जिह्वेन्द्रियजयी भव ॥ ७ ॥
घ्राणदेशमनुप्राप्ते शुभे गन्धेऽपरत्र वा ।
ज्ञात्वा वस्तुपरीणामं घ्राणेन्द्रियजयं कुरु ॥ ८ ॥
मनोज्ञं रूपमालोक्य यदि वा तद्विलक्षणम् ।
त्यजन् हर्षं जुगुप्सां च जय त्वं चक्षुरिन्द्रियम् ॥ ९ ॥
स्वरे श्रव्ये च वीणादेः खरोष्ट्रादेश्च दुःश्रवे ।
रतिं जुगुप्सां च जयन् श्रोत्रेन्द्रियजयी भव ॥ १० ॥
कोऽपि नास्तीह विषयो मनोज्ञ इतरोऽपि वा ।
य इन्द्रियैः नोपभुक्तस्तत्स्वास्थ्यं किं न सेव्यते ॥ ११ ॥
शुभा अप्यशुभायन्ते शुभायन्तेऽशुभा अपि ।
विषयास्तत् क्व रज्येत विरज्येत क्व चेन्द्रियैः ॥ १२ ॥
स एव रुच्यो द्वेष्यो वा विषयो यदि हेतुतः ।
शुभाशुभत्वं भावानां तन्न तत्त्वेन जातुचित् ॥ १३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं विमृश्य विषयेषु शुभाशुभत्व-
मौपाधिकं तदविमुक्तिविरक्तचेताः ।
हन्तेन्द्रियार्थमधिकृत्य जहीहि रागं
द्वेषं तथेन्द्रियजयाय कृताऽभिलाषः ॥ १४ ॥

अथैवं दुर्जयेन्द्रियजयं प्रति कोऽसाधारण उपाय इत्याह— मनःशुद्ध्या मनसो निर्मलत्वेन सन्त्यन्यान्यपि यमनियमवृद्धसेवा-शास्त्राभ्यासादीनीन्द्रियजयकारणानि किन्तु साधकतमं मनः-शुद्धिरेव । अन्यानि तु नैकान्तिकान्यात्यन्तिकानि वा, अवि-शुद्धे हि मनसि यमनियमादीनि सन्त्यपि नेन्द्रियजयनिबन्धनानि, एतदेवाह—यां विना यमेत्यादि । यां मनःशुद्धिं विना यमा मूलगुणा नियमा उत्तरगुणास्तैरुपलक्षणत्वाद् वृद्धसेवादिभिश्च यः कायक्लेशः स नृणां पुरुषाणां वृथा । सा च मनःशुद्धिः केषाञ्चित् स्वभावत एव भवति मरुदेव्यादीनाम् । केषाञ्चित् तु यमनियमा-द्युपायबलाद् नियन्त्रिते मनसि भवति ॥ ३४ ॥

अनियन्त्रितमनो यत्करोति तदाह—

मनः क्षपाचरो भ्राम्यन्नपशङ्कं निरङ्कुशः ।
प्रपातयति संसाराऽऽवर्त्तगर्त्ते जगत्त्रयीम् ॥३५॥

इह द्विविधं मनः । द्रव्यमनो भावमनश्च । तत्र द्रव्यमनो विशिष्टाकारपरिणताः पुद्गलाः । भावमनस्तु तद्‌द्रव्योपाधि-संकल्पात्मक आत्मपरीणामः । मन एव संकल्परूपं क्षपाचरो राक्षसः, अविषयेऽपि प्रवृत्तिशीलत्वात्, भ्राम्यन् तत्र तत्र विषये स्थैर्यमनवलम्बमानः । कथं भ्राम्यन् अपशङ्कं निर्भयं यथा भवति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदपि कुतः निर्गतस्तत्त्वभावनादिर्निवारकत्वात् अङ्कुशो यस्माद् स तथा। प्रपातयति प्रकर्षेण पातयति संसार एवावर्त्तप्रधानो-गर्त्तस्तत्र। जगत्त्रयीमिति। न स कश्चिद् जन्तुर्जगत्त्रयेऽप्यस्ति, यो निरङ्कुशेन मनसा संसारावर्त्तगर्त्ते न पात्यते। जगत्त्रयगतानां जन्तूनां संसारावर्त्तगर्त्ते पातनाद् जगत्त्रयीं पातयतीति उपचारा-दुक्तम् ॥ ३५ ॥

पुनरनियन्त्रिते मनसि दोषमाह—

तप्यमानांस्तपो मुक्तौ गन्तुकामान् शरीरिणः ।
वात्येव तरलं चेतः क्षिपत्यन्यत्र कुत्रचित् ॥ ३६ ॥

तप्यमानान् कुर्वाणान् किं तत्तपः। तथा मुक्तौ मोक्षे गन्तुकामान् गन्तुमध्यवसितान् शरीरिणो जन्तून्। तरलमेकत्रा-ऽनवस्थायि चेतो भावमनः कर्तृ क्षिपत्यन्यत्र कुत्रचित् मोक्षादन्यत्र नरकादौ। किंवद् वात्येव, यथान्यत्र गन्तुकामान् मनुष्यादीन् वातसमूहो विवक्षिताद् देशात् अन्यत्र नयति, एवं तरलं चेतोऽपि ॥ ३६ ॥

पुनरनियन्त्रितस्य मनसो दोषमाह—

अनिरुद्धमनस्कः सन् योगश्रद्धां दधाति यः ।
पद्भ्यां जिगमिषुर्ग्रामं स पङ्गुरिव हस्यते ॥ ३७ ॥

न निरुद्धं चापल्यात् व्यावर्तितं मनो येन सोऽनिरुद्धमनस्कः सन् योगश्रद्धां अहं योगीत्यभिमानं यो दधाति धारयति स हस्यते विवेकिभिः। क इव कथम्भूतः पङ्गुरिव पद्भ्यां पादाभ्यां ग्रामान्तरं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जिगमिषुः। पादप्रचाररूपो हि मनोरोधस्तदभावे कथं पङ्गु-ग्रामान्तरजिगमिषातुल्या योगश्रद्धेति ॥ ३७ ॥

न केवलमनिरुद्धमनस्कस्य योगश्रद्धा विफला यावदशुभ-कर्माणि बहुतराण्यस्य प्रादुःषन्तीत्युत्तरार्द्धेन प्रतिपादयितुं पूर्वार्द्धेन काक्का मनोरोधमुपदिशति—

मनोरोधे निरुध्यन्ते कर्माण्यपि समन्ततः।
अनिरुद्धमनस्कस्य प्रसरन्ति हि तान्यपि ॥ ३८ ॥

मनसो रोधो विषयेभ्यो निवारणं तस्मिन् सति निरुध्यन्ते प्रतिबाध्यन्ते आश्रवनिरोधात् कर्माण्यपि ज्ञानावरणादीन्यति-प्रबलानि समन्ततः सामस्त्येन। मनोरोधायत्तत्वात् कर्मरोधस्य। प्रकृतं योजयति अनिरुद्धमनस्कस्य पुंसस्तान्यपि कर्माणि प्रसरन्ति विवर्द्धन्ते मनःप्रसराधीनत्वात् कर्मप्रसरस्य ॥ ३८ ॥

तदेतन्निश्चित्य मनोनियन्त्रणाय यत्नः कार्य इत्येतदाह—

मनःकपिरयं विश्वपरिभ्रमणलम्पटः।
नियन्त्रणीयो यत्नेन मुक्तिमिच्छुभिरात्मनः ॥३९॥

मनो भावमन एव कपिर्मर्कटः। अयमिति सर्वेषां स्व-संवेदनसिद्धः कपित्वरूपेण साधर्म्यमाह—विश्वस्मिन् जगति परिभ्रमणमन्यान्यविषयग्रहरूपमनवस्थानं तत्र लम्पटो लोलुप-स्तदेवंविधो मनःकपिर्नियन्त्रणीयो निरोद्धव्यः। चापलं परि-त्याज्योचिते विषये परिस्थाप्यः। यत्नेन तत्त्वाभ्यासरूपेण।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

किं कुर्वद्भिः मुक्तिं मोक्षमिच्छन्तीत्येवंशीलास्तैरात्मनः स्वस्य । मनश्चापलनिरोधस्य साध्या हि मुक्तिरिति ॥ ३९ ॥

इदानीमिन्द्रियजयहेतुं मनःशुद्धिं प्रस्तौति—

दीपिका खल्वनिर्वाणा निर्वाणपथदर्शिनी ।
एकैव मनसः शुद्धिः समाम्नाता मनीषिभिः ॥४०॥

एकैव सा यमनियमादिरहितापि मनःशुद्धिः दीपिकेव दीपिका, किंविशिष्टा ?, अनिर्वाणा अविध्याता, निर्वाणस्य मोक्षस्य पन्था निर्वाणपथस्तं दर्शयतीत्येवंशीला निर्वाणपथदर्शिनी, मुमुक्षो इति शेषः, समाम्नाता पारम्पर्येण कथिता, कैः, मनीषिभिः पूर्वाचार्यैः, यदाह—

ज्ञाने ध्याने दाने माने मौने सदोद्यतो भवतु ।
यदि निर्मलं न चित्तं तदा हुतं भस्मनि समग्रम् ॥१॥४०॥

मनःशुद्धेरन्वयव्यतिरेकाभ्यां गुणान्तरदर्शनेनोपदेशमाह—

सत्यां हि मनसः शुद्धौ सन्त्यसन्तोऽपि यद्गुणाः ।
सन्तोऽप्यसत्यां नो सन्ति सैव कार्या बुधैस्ततः ॥४१॥

यद् यस्मात् सत्यां विद्यमानायां मनसः शुद्धावसन्तोऽप्यविद्यमाना अपि सन्ति भवन्ति । तत्फलसद्भावाद् गुणाः क्षान्त्यादयः, सन्तो विद्यमाना अपि गुणा असत्यां मनसः शुद्धौ नो सन्ति न सन्त्येव, तत्फलाभावात् । ततः कारणादन्वयव्यतिरेकाभ्यां निश्चितफला सैव मनःशुद्धिः कार्या बुधैर्विवेकिभिः ॥४१॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

ये तु आस्तामेषा मनःशुद्धिः, तपोबलेनैव मुक्तिं वयं साधयिष्यामः, इति प्रतिपद्यन्ते, तान् प्रत्याह—

मनःशुद्धिमबिभ्राणा ये तपस्यन्ति मुक्तये ।
त्यक्त्वा नावं भुजाभ्यां ते तितीर्षन्ति महार्णवम् ॥४२॥

मनःशुद्धिमबिभ्राणा अधारयन्तो ये मुक्तये मुक्तिनिमित्तं तपस्यन्ति तपःक्लेशमनुभवन्ति, ते दुर्ग्रहग्रहिलाः संनिहितां नावं परित्यज्य महार्णवं भुजाभ्यां तरीतुमिच्छन्ति । यथा नावमन्तरेण महार्णवो भुजाभ्यां दुस्तरः, तथा मनःशुद्धिमन्तरेण तपसा मुक्तिर्दुष्प्रापा ॥४२॥

ये तु ध्यानं तपःसहितं मुक्तिदं इति वदन्तो मनःशुद्धिमुपेक्षन्ते, ध्यानमेव तु कर्मक्षयकारणं इति प्रतिपन्नास्तान् प्रत्याह—

तपस्विनो मनःशुद्धिविनाभूतस्य सर्वथा ।
ध्यानं खलु मुधा चक्षुर्विकलस्येव दर्पणः ॥४३॥

तपस्विनोऽपि ध्यानं, खलु निश्चयेन, मुधा । किं विशिष्टस्य ? । सर्वथा मनःशुद्धिविनाभूतस्य लेशेनापि मनःशुद्धिरहितस्य । यद्यपि मनःशुद्धिरहितानामपि तपोध्यानबलेन नवमग्रैवेयकं यावद् गतिः श्रूयते, तथापि तत् प्रायिकम्, न च तत् फलत्वेन विवक्षितम् । मोक्षस्यैव फलरूपत्वात् । अतो ध्यानं मुधा । यथा दर्पणो रूपनिरूपणकारणमपि चक्षुर्विकलस्य मुधा, तथा ध्यानमपीति भावः ॥४३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उपसंहरति—

तदवश्यं मनःशुद्धिः कर्तव्या सिद्धिमिच्छता ।
तपःश्रुतयमप्रायैः किमन्यैः कायदण्डनैः ॥४४॥

तत् तस्मात् अवश्यं निश्चयेन मनःशुद्धिः कर्त्तव्या । सिद्धिं मोक्षमभिलषता । आवश्यकत्वे हेतुमाह—किमन्यैः कायदण्डनैः । कायो दण्ड्यत एभिरिति कायदण्डनास्तैः, कैः ?, तपः-श्रुतयमप्रायैः– तपोऽनशनादि, श्रुतमागमः, यमा महाव्रतानि । प्रायग्रहणाद् नियमादयो गृह्यन्ते। अत्रेदमनुयोक्तव्यम्—केयं मनसः शुद्धिः ? लेश्याविशुद्ध्या मनसो निर्मलत्वम् । काः पुनर्लेश्याः ? कृष्णनीलकापोततेजःपद्मशुक्लवर्णद्रव्यसाचिव्यादात्मनस्तदनुरूपः परिणामः, यदाह —

कृष्णादिद्रव्यसाचिव्यात् परिणामो य आत्मनः ।
स्फटिकस्येव तत्रायं लेश्याशब्दः प्रवर्त्तते ॥ १ ॥

तत्र कृष्णवर्णपुद्गलसन्निधाने य आत्मनोऽशुद्धतमः परिणामः सा कृष्णलेश्या । नीलद्रव्यसन्निधाने य आत्मनोऽशुद्धतरः परिणामः सा नीललेश्या । कापोतवर्णद्रव्यसान्निध्यात्तदनुरूपोऽशुद्ध आत्मपरिणामः कापोतलेश्या । तेजोवर्णद्रव्यसान्निध्यात्तदनुरूपः शुद्ध आत्मपरिणामस्तेजोलेश्या । पद्मवर्णद्रव्यसान्निध्यात्तदनुरूपः शुद्धतर आत्मपरिणामः पद्मलेश्या । शुक्लवर्णद्रव्यसान्निध्याच्छुद्धतम आत्मपरिणामः शुक्ललेश्या ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृष्णादिद्रव्याणि च सकलकर्मप्रकृतिनिःस्यन्दभूतानि, तदुपाधिजन्मानो भावलेश्याः कर्मस्थितिहेतवः। यदाह—

ताः कृष्णनीलकापोततैजसीपद्मशुक्लनामानः।
श्लेष इव वर्णबन्धस्य कर्मबन्धस्थितिविधात्र्यः॥ २॥

एताश्चाऽशुद्धतमाऽशुद्धतराऽशुद्धशुद्धशुद्धतरशुद्धतमात्मपरिणामरूपा जम्बूफलखादकदृष्टान्ताद् ग्रामघातकदृष्टान्ताच्चावसेयाः। आगमगाथाश्चात्र—

[1]जह जम्बुतरुवरेगो सुपक्कफलभरियनमियसालग्गो।
दिट्ठो छहि पुरिसेहिं ते बिंती जंबु भक्खेमो॥ १॥
किह पुण ते बिंतेगो आरुहमाणाण जीअसंदेहो।
ता छिंदिऊण मूले पाडेउं ताहि भक्खेमो॥ २॥
बीयाह एद्देहेणं किं छिन्नेण तरुण उ अम्हंति।
साहा महल्ल छिंदह तइओ बेइ पसाहाओ॥ ३॥
गुच्छे चउत्थउ पुण पंचमओ बेइ गेण्हह फलाइं।
छट्ठो बेई पडिया एइच्चिय खायह य घित्तुं॥ ४॥

---

(१) यथा जम्बूतरुवरएकः सुपक्वफलभरितनमितशालाग्रः।
दृष्टः षड्भिः पुरुषैस्ते ब्रुवते जम्बूनि भक्षयामः॥ १॥
कथं पुनस्ते ब्रुवन्ति एक (आह) आरोहतां जीवसन्देहः।
ततश्छित्त्वा मूलतः पातयित्वा तानि भक्षयामः॥ २॥
द्वितीय आह एतावता किं छिन्नेन तरुणा तु अस्माकमिति?।
शाखा महतीश्छिन्त तृतीयो ब्रवीति प्रशाखाः॥ ३॥
गुच्छांश्चतुर्थकः पुनः पंचमो ब्रवीति गृह्णीत फलानि।
षष्ठस्तु ब्रवीति पतितान्येवैतानि खादत गृहीत्वा॥ ४॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]दिट्ठंतस्सोवणयो जो वेइ तरुं तु छिंद मूलाओ ।
सो वट्टइ किण्हाए साल महल्लाओ नीलाए ॥ ५ ॥
हवइ पसाहा काऊ गुच्छे तेऊ फलाणि पम्हाए ।
पडियाणि सुक्कलेसा अहवा अन्नं उआहरणं ॥ ६ ॥
चोरा गामवहत्थं विणिग्गया एगु वेइ घाएह ।
जं पेच्छह तं सव्वं दुपयं चउप्पयं वावि ॥ ७ ॥
बीओ माणुस पुरिसे य तइओ साउहे चउत्थो अ ।
पंचमओ जुज्झंते छट्ठो उण तत्थिमं भणइ ॥ ८ ॥
एक्कं ता हरह धणं बीअं मारेह मा कुणह एयं ।
केवल हरह धणं ता उवसंहारो इमो तेसिं ॥ ९ ॥
सव्वे मारेहत्ति वट्टइ सो किण्हलेसपरिणामो ।
एवं कमेण सेसा जा चरमो सुक्कलेसाए ॥ १० ॥

---

(१) दृष्टान्तस्योपनयो योऽब्रवीत् तरुं तु छिन्त मूलतः ।
स वर्त्तते कृष्णायां शाखा महतीर्नीलायाम् ॥ ५ ॥
भवति प्रशाखाः (छिन्तेति) कापोती गुच्छांस्तैजसी फलानि पद्मा ।
पतितानि शुक्ललेश्या अथवाऽन्यदुदाहरणम् ॥ ६ ॥
चौरा ग्रामवधार्थं विनिर्गता एको ब्रवीति घातयत ।
यं प्रेक्षध्वं तं सर्वं द्विपदं चतुष्पदं वापि ॥ ७ ॥
द्वितीयो मनुष्यान्, पुरुषान् तृतीयः सायुधांश्चतुर्थस्तु ।
पंचमस्तु युध्यतः षष्ठः पुनस्तत्रेदं भणति ॥ ८ ॥
एकं तावद् हरत धनं द्वितीयं मारयथ मा कार्षीतत् ।
केवलं हरत धनं तत् तदुपसंहारस्त्वयं तेषाम् ॥ ९ ॥
सर्वान् मारयतेति वर्त्तते स कृष्णलेश्यापरिणामः ।
एवं क्रमेण शेषा यावच्चरमः शुक्ललेश्यायाम् ॥ १० ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एतास्त्वाद्यास्तिस्रोऽप्रशस्ताः, उत्तराः प्रशस्ताः। एताश्च मनुष्याणां परिवर्त्तमाना भवन्ति। ततश्च यदा उत्तरास्तिस्र आत्मनो भवन्ति तदा विशुद्धिरित्याख्यायते। यदा चैता मरण-काले भवन्ति, तदा तदनुरूपासु गतिष्वात्मा प्रयाति। तत्र कृष्णनीलकापोतलेश्यापरिणतो नरकेषु तिर्यक्षु चोत्पद्यते। पीत-पद्मशुक्ललेश्यापरिणतस्तु मनुष्येषु देवेषु चोत्पद्यते। यदाहु-र्भगवन्तः—

'जल्लेसे मरइ तल्लेसेसु उववज्जइ।

लौकिकास्त्वाहुः—

अन्ते च भरतश्रेष्ठ! या मतिः सा गतिर्नृणामिति।

अत्र यदि मतिश्चेतनामात्रं तदा या मतिः सा गतिरिति किं केन संगतम्?। अथाशुद्धतमादिपरिणामयुक्ता मतिर्व्याख्यायते तर्हि-दमेव पारमर्षं वचनं साध्वित्यलंप्रसङ्गेन। एवं तावदशुद्धलेश्या-त्यागेन विशुद्धलेश्यापरिग्रहेण च मनसः शुद्धिरुक्ता॥ ४४॥

इदानीं मनःशुद्धिनिमित्तमीषत्करमुपायान्तरमुपदिशति—

मनःशुद्ध्यै च कर्तव्यो रागद्वेषविनिर्जयः।
कालुष्यं येन हित्वात्मा स्वस्वरूपेऽवतिष्ठते॥४५॥

मनसो भावमनस आत्मरूपस्य शुद्धिहेतवे कर्तव्यो रागद्वेषयोः, प्रीत्यप्रीत्यात्मकयोर्विनिर्जयो निरोधः, उदितयोर्विफलीकरणेन अनुदितयोश्चानुत्पादनेन। तथा सति किं स्यात्? कालुष्यम-

---

(१) यल्लेश्यो म्रियते तासु लेश्यासु उत्पद्यते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शुद्धत्वं हित्वा आत्मा भावमनोरूपः स्वकीये स्वरूपे परमशुद्धिलक्षणेऽवतिष्ठते स्थिरो भवति ॥ ४५ ॥

अथ राग-द्वेषयोर्दुर्जयत्वं श्लोकत्रयेणाह—

आत्मायत्तमपि स्वान्तं कुर्वतामत्र योगिनाम् ।
रागादिभिः समाक्रम्य परायत्तं विधीयते ॥ ४६ ॥

आत्मायत्तमपि आत्मनि निमग्नमपि स्वान्तं मनः कुर्वतां योगिनामत्र जगति रागादिभी रागद्वेषाभ्यां तदविनाभूतेन च मोहेन समाक्रम्य रक्तं द्विष्टं मूढं च कृत्वा परायत्तमात्मनोऽनधीनं क्रियते ॥४६॥

तथा—

रक्ष्यमाणमपि स्वान्तं समादाय मनाग् मिषम् ।
पिशाचा इव रागाद्याश्छलयन्ति मुहुर्मुहुः ॥४७॥

रक्ष्यमाणमपि गोप्यमानमपि यमनियमादिभिर्मन्त्रतन्त्रप्रायैः स्वान्तं भावमनः, समादाय पुरस्कृत्य मनाग् मिषं स्वल्पं छलं प्रमादरूपं, छलयन्ति—आत्मवशं कुर्वन्ति। क एते? रागादयः क इव? पिशाचा इव। मुहुर्मुहुरिति यदा यदा प्रमादलेशोऽपि भवति तदा तदा छलयन्ति। यथा हि पिशाचा मन्त्रादिकृतरक्षमपि साधकं छलं प्राप्यात्मवशं कुर्वन्ति, तथा रागादयोऽपि योगिमन इति ॥४७॥

5120

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा—

रागादितिमिरध्वस्तज्ञानेन मनसा जनः ।
अन्धेनान्ध इवाकृष्टः पात्यते नरकावटे ॥ ४८ ॥

रागादय एव सम्यग्दर्शनविघातहेतुत्वात् तिमिरमक्ष्णोर्विप्लवः तेन ध्वस्तं ज्ञानं तत्त्वालोको यस्य तेन तथाविधेन मनसा आकृष्टो जनो नरकावटे नरककूपे पात्यते । केन क इव ? अन्धेनान्ध इव । रागादिभिरन्धीकृतेन मनसा जनोऽप्यन्धः, तस्यैव मार्गदर्शकत्वात् । ततो यथाऽन्धेनान्धः समाकृष्याऽवटे पात्यते तथाऽन्धेन मनसा अन्धो जनो नरकावटे पात्यते ।

अत्रान्तरश्लोकाः—

द्रव्यादिषु रतिप्रीती राग इत्यभिधीयते ।
तेष्वेवारतिमप्रीतिं चाहुर्द्वेषं मनीषिणः ॥ १ ॥
उभावेतौ दृढतरं बन्धनं सर्वजन्मिनाम् ।
सर्वदुःखानोकहानां मूलकन्दौ प्रकीर्तितौ ॥ २ ॥
कः सुखे विस्मयस्मेरो दुःखे कः कृपणो भवेत् ? ।
मोक्षं को नाप्नुयाद् रागद्वेषौ स्यातां न चेदिह ॥ ३ ॥
रागेण ह्यविनाभावी द्वेषो द्वेषेण चेतरः ।
तयोरेकतरत्यागी परित्यक्तावुभावपि ॥ ४ ॥
दोषाः स्मरप्रभृतयो रागस्य परिचारकाः ।
मिथ्याभिमानप्रमुखा द्वेषस्य तु परिच्छदः ॥ ५ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तयोर्मोहः पिता बीजं नायकः परमेश्वरः ।
ताभ्यामभिन्नस्तद्रूप्यः सर्वदोषपितामहः ॥ ६ ॥
एवमेते त्रयो दोषा नातो दोषान्तरं क्वचित् ।
तैरमी जन्तवः सर्वे भ्रम्यन्ते भववारिधौ ॥ ७ ॥
स्वभावेन हि जीवोऽयं स्फटिकोपलनिर्मलः ।
उपाधिभूतैरेतैस्तु तादात्म्येनावभासते ॥ ८ ॥
अराजकमहो ! विश्वं यदेभिः पश्यतोहरैः ।
ह्रियते ज्ञानसर्वस्वं स्वरूपमपि जन्मिनाम् ॥ ९ ॥
ये जन्तवो निगोदेषु येऽपि चासन्नमुक्तयः ।
सर्वत्रास्पृष्टकरुणा पतत्येषां पताकिनी ॥ १० ॥
मुक्त्या वैरं किमेतेषां मुक्तिकामैः सहाथवा ।
येनोभयसमायोगस्तैर्भवन् प्रतिषिध्यते ॥ ११ ॥
दोषत्रयत्रमाणां हि किमुपेक्षाक्षमार्हताम् ।
जगद्दाहकरं यत्र शान्तं दोषप्रदीपनम् ॥ १२ ॥
व्याघ्रव्यालजलाग्निभ्यो न बिभेति तथा मुनिः ।
लोकद्वयापकारिभ्यो रागादिभ्यो भृशं यथा ॥ १३ ॥
वर्त्मातिसंकटमहो ! योगिभिः समुपाश्रितम् ।
रागद्वेषौ व्याघ्रसिंहौ पार्श्वतो यस्य तिष्ठतः ॥१४॥४८॥

अथ रागद्वेषजयोपायमुपदिशति—

अस्ततन्द्रैरतः पुंभिर्निर्वाणपदकाङ्क्षिभिः ।
विधातव्यः समत्वेन रागद्वेषद्विषज्जयः ॥ ४९ ॥

यत एवंविधौ रागद्वेषौ, अतः कारणादस्ततन्द्रैर्निरस्तप्रमादैः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुंभिः पुरुषधर्मोपेतैर्योगिभिः किंविशिष्टैर्निर्वाणपदकाङ्क्षिभिः निर्वान्ति रागद्वेषोपतप्ताः शीतीभवन्त्यस्मिन्निति निर्वाणं तदेव पद्यमानत्वात् पदं तत्काङ्क्षणशीला निर्वाणपदकाङ्क्षिणः, तैर्विधातव्यो विधेयो रागद्वेषावेवोपतापकारित्वाद् द्विषन्तौ तयोर्जयोऽभिभवः केनोपायेनेत्याह समत्वेन, रागहेतुषु द्वेषहेतुषु च माध्यस्थ्येनौदासीन्येनेति यावत् ॥ ४९ ॥

यथा साम्यं रागद्वेषजयोपायस्तथाऽऽह—

अमन्दानन्दजनने साम्यवारिणि मज्जताम् ।
जायते सहसा पुंसां रागद्वेषमलक्षयः ॥ ५० ॥

साम्यमेवातिशीतीभावजनकत्वाद् वारि । तत्र किं विशिष्टे, अमन्दस्तीव्रो य आनन्द आह्लादस्तस्य जनने मज्जतां तन्मध्यमवगाहमानानां सहसा अकस्मात् केषां पुंसां रागद्वेषावेव मलस्तस्य क्षयः । प्रसिद्धमेतद् यथा वारिणि मज्जतां मलक्षयो भवति, एवं साम्ये निमज्जतां लीयमानानां रागद्वेषक्षयो भवति ॥ ५० ॥

न परं रागद्वेषयोरेवापनायकं साम्यम्, अपि तु सर्वकर्मणामपीत्याह—

प्रणिहन्ति क्षणार्धेन साम्यमालम्ब्य कर्म तत् ।
यन्न हन्यान्नरस्तीव्रतपसा जन्मकोटिभिः ॥५१॥

प्रणिहन्ति निहन्ति क्षणार्धेनान्तर्मुहूर्तेन साम्यमुक्तलक्षणमालम्ब्याश्रित्य तत् कर्म ज्ञानावरणीयादि, यत् किञ्चित् कर्म न हन्याद् नापनयेद् नरः पुमान् तीव्रतपसा तीव्रेण शरीरमनसोः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संतापहेतुनाऽनशनादिरूपेणार्थात् साम्यरहितेन जन्मकोटिभिर्बहुभिरपि जन्मभिः ॥ ५१ ॥

कथमन्तर्मुहूर्तमात्रेण साम्यं सर्वकर्मापनायकमित्याह—

कर्म जीवं च संश्लिष्टं परिज्ञातात्मनिश्चयः ।
विभिन्नीकुरुते साधुः सामायिकशलाकया ॥५२॥

सामायिकमेव समत्वमेव शलाका वंशादिमयी तया विभिन्नीकुरुते पृथक् करोति साधुर्यतिः । किं विभिन्नीकुरुते ? । कर्म जीवं च संश्लिष्टं संपृक्तम्, यथा श्लेषद्रव्यसंपृक्तानां पात्रादीनां शलाकया पृथग्भावः क्रियते तथा जीवकर्मणोरपि तादात्म्येन संबद्धयोः सामायिकेनेति । अयमेव कर्मक्षयः । न हि कर्मपुद्गलानामात्यन्तिकः क्षयः संभवति, नित्यत्वात् तेषाम्, आत्मनस्तु पृथग्भूतानि कर्माणि क्षीणानि इत्युच्यन्ते । ननु वाङ्मात्रमेतद् यत् सामायिकशलाकया साधुः कर्माणि पृथक् करोतीत्याह—परिज्ञातात्मनिश्चयः परिज्ञातः पुनः पुनः संविदित आत्मनिश्चय आत्मनिर्णयो येन स तथा । अयमर्थः—आत्मज्ञानमभ्यस्यंस्तथाविधावरणापगमेन तथा पुनः पुनः स्वसंवेदनेनात्मनिश्चयं दृढं करोति यथात्मरूपाद् भिन्नरूपाणि आत्मरूपावारकाणि च कर्माणि परमसामायिकबलेन निर्जरयति ॥५२॥

न केवलमात्मनिश्चयबलेन कर्माणि पृथक् करोति यावदात्मनि परमात्मदर्शनमपि भवतीत्याह—

रागादिध्वान्तविध्वंसे कृते सामायिकांशुना ।
स्वस्मिन् स्वरूपं पश्यन्ति योगिनः परमात्मनः ॥५३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रागादय एव स्वरूपतिरोधायकत्वाद् ध्वान्तं तस्य विध्वंसस्तस्मिन् कृते। केन ?। सामायिकमेवांशुरादित्यस्तेन। ततः किं स्यात् ?। स्वस्मिन्नात्मनि परमात्मनः स्वरूपं योगिनः पश्यन्ति। सर्वेऽपि ह्यात्मानस्तत्त्वतः परमात्मान एव, केवलज्ञानस्य येन तेनांशेन सर्वत्र भावात्, यत् पारमर्षम्—'सव्वजीवाणं पि अ णं अक्खरस्साणंतभागो निच्चुग्घाडिओ चेव। केवलं रागद्वेषादिदोषकलुषितत्वाद् न साक्षात् परमात्मस्वरूपाभिव्यक्तिः। सामायिकांशुमत्प्रकाशनेन तु रागादितिमिरेऽपगते आत्मन्येव परमात्मस्वरूपमभिव्यक्तं भवति ॥ ५३ ॥

इदानीं साम्यप्रभावं व्यनक्ति—

स्निह्यन्ति जन्तवो नित्यं वैरिणोऽपि परस्परम्।
अपि स्वार्थकृते साम्यभाजः साधोः प्रभावतः ॥५४॥

अपि स्वार्थकृते स्वार्थनिमित्तमपि साम्यवतः साधोः प्रभावाद् नित्यवैरिणोऽप्यहिनकुलादयः स्निह्यन्ति परस्परं मैत्रीं कुर्वन्ति। अयमर्थः—ईदृशः साम्यस्य महिमा यदेतत् स्वनिमित्तं कृतमपि परेषु नित्यवैरिषु पर्यवस्यति, यत् स्तुवन्ति विद्वांसः—

देवाकृष्य करेण केशरिपदं दन्ती कपोलस्थलीं
कण्डूयत्यहिरेष बभ्रुपुरतो मार्गं निरुध्य स्थितः।
व्याघ्रव्यात्तविशालवक्त्रकुहरं जिघ्रत्यजस्रं मृगो
यत्रैवं पशवः प्रशान्तमनसस्तामर्थये त्वद्भुवम् ॥ १ ॥

---

(१) सर्वजीवानामप्यक्षरस्यानन्तभागो नित्योद्घाटित एव।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लौकिका अपि साम्यवतां योगिनां स्तुतिमाहुर्यथा---तत्सन्निधौ वैरत्याग इति । अत्रान्तरश्लोकाः---

चेतनाचेतनैर्भावैरिष्टानिष्टतया स्थितैः ।
न मुह्यति मनो यस्य तस्य साम्यं प्रचक्षते ॥ १ ॥
गोशीर्षचन्दनालेपे वासीच्छेदे च बाहयोः ।
अभिन्ना चित्तवृत्तिश्चेत् तदा साम्यमनुत्तरम् ॥ २ ॥
अभिष्टोतरि च प्रीते रोषान्धे चापि शप्तरि ।
यस्याविशेषणं चेतः स साम्यमवगाहते ॥ ३ ॥
न हूयते तप्यते न दीयते वा न किञ्चन ।
अहो ! अमूल्यक्रीतीयं साम्यमात्रेण निर्वृतिः ॥ ४ ॥
प्रयत्नक्लिष्टैः क्लिष्टैश्च रागाद्यैः किमुपासितैः ? ।
अयत्नलभ्यं हृद्यं च श्रय साम्यं सुखावहम् ॥ ५ ॥
परोक्षार्थप्रतिक्षेपात् स्वर्गमोक्षावपह्नुताम् ।
साम्यशर्म स्वसंवेद्यं नास्तिकोऽपि न निह्नुते ॥ ६ ॥
कविप्रलापरूढेऽस्मिन्नमृते किं विमुह्यसि ? ।
स्वसंवेद्यरसं मूढ ! पिब साम्यरसायनम् ॥ ७ ॥
खाद्यलेह्यचूष्यपेयरसेभ्यो विमुखा अपि ।
पिबन्ति यतयः स्वैरं साम्यामृतरसं मुहुः ॥ ८ ॥
कण्ठपीठे लुठन् भोगिभोगो मन्दारदाम च ।
यस्याप्रीत्यै नवा नो वा प्रीत्यै स समतापतिः ॥ ९ ॥
न गूढं किञ्चनाचार्यमुष्टिः काचिद् न चापरा ।
बालानां सुधियां चैकं साम्यं भवरुजौषधम् ॥ १० ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अतिक्रूरतरं कर्म शान्तानामपि योगिनाम् ।
यद् घ्नन्ति साम्यशस्त्रेण रागादीनां कुलानि ते ॥ ११ ॥
अयं प्रभावः परमः समत्वस्य प्रतीयताम् ।
यत् पापिनः क्षणेनापि पदमियृति शाश्वतम् ॥ १२ ॥
यस्मिन् सति सफलतामसत्यऽफलतां व्रजेत् ।
रत्नत्रयं नमस्तस्मै समत्वाय महौजसे ॥ १३ ॥
विगाह्य सर्वशास्त्रार्थमिदमुच्चैस्तरां ब्रुवे ।
इहामुत्र स्वपरयोर्नान्यत् साम्यात् सुखाकरम् ॥ १४ ॥
संसर्गेऽप्युपसर्गाणामपि मृत्यावुपस्थिते ।
नैतत्कालोचितं किञ्चित् साम्यादौपयिकं परम् ॥ १५ ॥
रागद्वेषादिशत्रुप्रतिहतिनिपुणां साम्यसाम्राज्यलक्ष्मीं
भुक्त्वा भुक्त्वा निरन्ताः शुभगतिपदवीं लेभिरे प्राणभाजः ।
तेनैतद् मानुषत्वं सपदि सफलतां नेतुकामैर्निकामं
साम्ये निस्सीमसौख्यप्रचयपरिचिति न प्रमादो विधेयः ॥१६॥५४॥

नन्ववगतमेतत् सर्वदोषनिवारणकारणं समत्वम्, प्रीताः स्मः, यदि तु साम्यं प्रत्यप्युपायः कश्चन स्यात् । तदुपायेऽप्युपायान्तरमीषत्करं स्यात्, तदा निराकाङ्क्षाः प्रमोदामहे, इत्येतद् मनसि कृत्वा श्लोकद्वयमाह—

साम्यं स्याद् निर्ममत्वेन तत्कृते भावनाः श्रयेत् ।
अनित्यतामशरणं भवमेकत्वमन्यताम् ॥ ५५ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अशौचमाश्रवविधिं संवरं कर्मनिर्जराम् ।
धर्मस्वाख्याततां लोकं द्वादशीं बोधिभावनाम् ॥५६॥

साम्यं यथोक्तस्वरूपं निर्ममत्वेनोपायेन स्यात् । ननु साम्य-निर्ममत्वयोः को भेदः ? । उच्यते—साम्यं राग-द्वेषयोरुभयोरपि प्रतिपक्षभूतम्, निर्ममत्वं रागस्यैकस्य प्रतिपक्षभूतम् । तद्दोषद्वय-निवारणाय साम्ये चिकीर्षिते भवति बलवत्तरस्य रागस्य प्रति-पक्षभूतं निर्ममत्वमुपायः । यथा हि बलवत्यां सेनायां बलवत्तरस्य कस्यचिद् विनाश इतरेषां विनाशाय, तथा रागनिग्रहहेतु-निर्ममत्वं हीनबलानां द्वेषादीनां विनाशायेति । अलं प्रसङ्गेन । निर्ममत्वस्याप्युपायं दर्शयति—तत्कृते निर्ममत्वनिमित्तं भावना अनुप्रेक्षाः श्रयेद् योगी । प्रकृता भावना नामतः कथयति—अनित्यतामित्यादि, स्पष्टं चैतत् ॥ ५५ ॥ ५६ ॥

तद्यथा । तद्यथा इत्युपस्कारपूर्वकमनित्यताख्यां प्रथमां भावनां दर्शयति—

यत्प्रातस्तन्न मध्याह्ने यन्मध्याह्ने न तन्निशि ।
निरीक्ष्यते भवेऽस्मिन् हो ! पदार्थानामनित्यता ॥५७॥
शरीरं देहिनां सर्वपुरुषार्थनिबन्धनम् ।
प्रचण्डपवनोद्धूतघनाघनविनश्वरम् ॥ ५८ ॥
कल्लोलचपला लक्ष्मीः संगमाः स्वप्नसंनिभाः ।
वात्याव्यतिकरोत्क्षिप्ततूलतुल्यं च यौवनम् ॥ ५९ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्लोकत्रयं स्पष्टम्, नवरं शरीरमित्यादिश्लोके पूर्वार्द्धे यदिति शेषः; उत्तरार्द्धे तदिति शेषः ॥

अत्रान्तरश्लोकाः—

स्वतोऽन्यतश्च सर्वाभ्यो दिग्भ्यश्चागच्छदापदः ।
कृतान्तदन्तयन्त्रस्थाः कष्टं जीवन्ति जन्तवः ॥ १ ॥
वज्रसारेषु देहेषु यद्यास्कन्दत्यनित्यता ।
रम्भागर्भसगर्भेषु का कथा तर्हि देहिनाम् ? ॥ २ ॥
असारेषु शरीरेषु स्थेमानं यश्चिकीर्षति ।
जीर्णशीर्णपलालोत्थे चञ्चापुंसि करोतु सः ॥ ३ ॥
न मन्त्रतन्त्रभैषज्यकरणानि शरीरिणाम् ।
त्राणाय मरणव्याघ्रमुखकोटरवासिनाम् ॥ ४ ॥
प्रवर्द्धमानं पुरुषं प्रथमं ग्रसते जरा ।
ततः कृतान्तस्त्वरते धिगहो ! जन्म देहिनाम् ॥ ५ ॥
यद्यात्मानं विजानीयात् कृतान्तवशवर्तिनम् ।
को ग्रासमपि गृह्णीयात् पापकर्मसु का कथा ? ॥ ६ ॥
समुत्पद्य समुत्पद्य विपद्यन्तेऽप्सु बुद्बुदाः ।
यथा, तथा क्षणेनैव शरीराणि शरीरिणाम् ॥ ७ ॥
आढ्यं निःस्वं नृपं रङ्कं ज्ञं मूर्खं सज्जनं खलम् ।
अविशेषेण संहर्तुं समवर्ती प्रवर्तते ॥ ८ ॥
न गुणेष्वस्य दाक्षिण्यं द्वेषो दोषेषु चास्ति न ।
दवाग्निवदरण्यानि विलुम्पत्यन्तको जनम् ॥ ९ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इदं तु मा स्म शङ्किष्ठाः कुशास्त्रैरपि मोहितः।
कुतोऽप्युपायतः कायो निरपायो भवेदिति॥ १०॥
ये मेरुं दण्डसात् कर्तुं पृथ्वीं वा छत्रसात् क्षमाः।
तेऽपि त्रातुं स्वमन्यं वा न मृत्योः प्रभविष्णवः॥ ११॥
आ कीटादा च देवेन्द्रात् प्रभावन्तकशासने।
अनुन्मत्तो न भाषेत कथञ्चित् कालवञ्चनम्॥ १२॥
पूर्वेषां चेत् क्वचित् कश्चिज्जीवन् दृश्येत तद् वयम्।
मनोरथातीतमपि प्रतीमः कालवञ्चनम्॥ १३॥
अनित्यं यौवनमपि प्रतियन्तु मनीषिणः।
बलरूपापहारिण्या जरसा जर्जरीभवेत्॥ १४॥
यौवने कामिनीभिर्ये काम्यन्ते कामलीलया।
निकामकृतथूत्कारं त्यज्यन्ते तेऽपि वार्द्धके॥ १५॥
यदर्जितं बहुक्लेशैरभुक्त्वा यच्च पालितम्।
तद् याति क्षणमात्रेण निधनं धनिनां धनम्॥ १६॥
उपमानपदं किं स्यात् फेनबुद्बुदविद्युताम्।
धनस्य नश्यतोऽवश्यं पश्यतामपि तद्वताम्?॥ १७॥
समागमाः सापगमाः सुहृद्भिर्बन्धुभिर्निजैः।
स्वस्य वाऽन्यस्य वा नाशे विकृतेऽप्रकृतेऽपि वा॥ १८॥
ध्यायन्ननित्यतां नित्यं मृतं पुत्रं न शोचति।
नित्यताग्रहमूढस्तु कुड्यभङ्गेऽपि रोदिति॥ १९॥
एतच्छरीरधनयौवनबान्धवादि
तावद् न केवलमनित्यमिहासुभाजाम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विश्वं सचेतनमचेतनमप्यशेष-

मुत्पत्तिधर्मकमनित्यमुशन्ति सन्तः ॥२०॥५७॥५८॥५९॥

अनित्यताभावनामुपसंहरन्नुपदर्शयति --

इत्यनित्यं जगद्वृत्तं स्थिरचित्तः प्रतिक्षणम् ।

तृष्णाकृष्णाहिमन्त्राय निर्ममत्वाय चिन्तयेत् ॥६०॥

इति पूर्वोक्तप्रकारेण जगद्वृत्तं जगत्स्वरूपमनित्यं प्रतिक्षणं चिन्तयेदवधारयेत्, स्थिरचित्तो निश्चलचित्तः सन् । किमर्थम् ? निर्ममत्वाय—अनित्यत्वादिभावनासाध्यवीतरागत्वनिमित्तम्। किं विशिष्टाय ? । तृष्णाकृष्णाहिमन्त्राय—तृष्णा रागः सैव कृष्णाहिस्तस्या मन्त्राय मन्त्रस्वरूपाय । अहिशब्दः स्त्रीलिङ्गोऽप्यस्तीति नोपमानोपमेययोर्भिन्नलिङ्गत्वम् । अनित्यता ॥ ६० ॥

अथाशरणभावनामुपदिशति —

इन्द्रोपेन्द्रादयोऽप्येते यन्मृत्योर्यान्ति गोचरम् ।

अहो ! तदन्तकातङ्के कः शरण्यः शरीरिणाम् ? ॥६१॥

इन्द्रः सुरनाथः, उपेन्द्रो वासुदेवस्तावादी येषां सुरमनुष्यादीनां, चक्रवर्तिपरिहारेणोपेन्द्रग्रहणं लोके मृत्युकाले शरणत्वोपहासपरम्, तेऽपि यद् यस्माद् मृत्योर्गोचरं वशं यान्ति ; अहो इति विस्मये, तत् तस्मादन्तकातङ्के मृत्युभये उपस्थिते कः शरण्यः शरणे साधुः शरीरिणां जन्तूनाम् ?—कोऽपि नास्तीत्यर्थः ॥ ६१ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा—

पितुर्मातुः स्वसुर्भ्रातुस्तनयानां च पश्यताम् ।
अत्राणो नीयते जन्तुः कर्मभिर्यमसद्मनि ॥ ६२ ॥

पित्रादीनां पश्यतां तानन्नाद्दत्यैवात्राणोऽशरणो जन्तुः कर्मभिः परभववेदनीयैः शुभाशुभैर्यमसद्मनि यमालये नीयते। एतच्च लोकप्रसिद्ध्यपेक्षम्, न पुनर्यमसद्मनि कश्चिद् नीयते, अपि तु चतुर्गतिस्वरूपे संसारे तत्तद्गत्युचितैः कर्मभिस्तत्र तत्र नीयत इति परमार्थः ॥ ६२ ॥

तथा—

शोचन्ति स्वजनानन्तं नीयमानान् स्वकर्मभिः ।
नेष्यमाणं तु शोचन्ति नात्मानं मूढबुद्धयः ॥ ६३ ॥

शोचन्ति शोकविषयतां नयन्ति स्वजनान् बन्धून्, अन्तमवसानं नीयमानान् स्वकर्मभिर्भवान्तरवेदनीयैर्मूढबुद्धय इत्युत्तरेण योगः। आत्मानं तु स्वकर्मभिरेवान्तं नेष्यमाणं न शोचन्ति। संनिहित-परित्यागे हि व्यवहितं प्रति कारणं वाच्यम्, संनिहितश्चात्मा, तस्य शोचनीयतां मुक्त्वा व्यवहितस्य स्वजनादेः शोचनं बुद्धिमोह-निबन्धनमेव ॥ ६३ ॥

अशरणभावनामुपसंहरति—

संसारे दुःखदावाग्निज्वलज्ज्वालाकरालिते ।
वने मृगार्भकस्येव शरणं नास्ति देहिनः ॥ ६४ ॥

संसारे शरणं देहिनो नास्ति। कस्येव कुत्र ?। वने

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मृगार्भकस्येव। किंविशिष्टे संसारे ?। दुःखमेव दावाग्निस्तस्य ज्वलन्त्यो या ज्वाला दुःखस्यैव प्रभेदास्तैः करालिते रौद्रे। वने किं-विशिष्टे ?। दुःखो दुःखहेतुर्यो दावाग्निस्तस्य ज्वलन्त्यो या ज्वालास्ताभिः करालिते। अर्भकग्रहणमतिमौग्ध्यख्यापनार्थम्। अशरणभावना।

अत्रान्तरश्लोकाः—

अष्टाङ्गेनायुर्वेदेन जीवातुभिरथागदैः।
मृत्युंजयादिभिर्मन्त्रैस्त्राणं नैवास्ति मृत्युतः ॥ १ ॥
खड्गपञ्जरमध्यस्थश्चतुरङ्गचमूवृतः।
रङ्कवत् कृष्यते राजा हठेन यमकिङ्करैः ॥ २ ॥
जलमध्यस्थितस्तम्भमूर्द्धपञ्जरमध्यगम्।
राज्ञः प्रियसुतं मृत्युश्चकर्षान्यस्य का कथा ? ॥ ३ ॥
षष्टिं पुत्रसहस्राणि सगरस्यापि चक्रिणः।
तृणवत् त्राणरहितान्यदहज्ज्वलनप्रभः ॥ ४ ॥
आस्कन्द्य स्कन्दकाचार्यं मुनिपञ्चशतीं घ्नतः।
न कश्चिदभवत् त्राता पालकादन्तकादिव ॥ ५ ॥
यथा मृत्युप्रतीकारं पशवो नैव जानते।
विपश्चितोऽपि हि तथा धिक् प्रतीकारमूढताम् ॥ ६ ॥
येऽसिमात्रोपकरणाः कुर्वते क्ष्मामकण्टकाम्।
यमभ्रूभङ्गभीतास्तेऽप्यास्ये निदधतेऽङ्गुलीः ॥ ७ ॥
स्नेहादाश्लिष्य शक्रेणार्द्धासनेऽध्यास्यते स्म यः।
श्रेणिकः सोऽप्यशरणोऽश्नोतव्यां प्राप तां दशाम् ॥ ८ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मुनीनामप्यपापानामसिधारोपमैर्व्रतैः ।
न शक्यते कृतान्तस्य प्रतिकर्तुं कदाचन ॥ ९ ॥
अशरण्यमहो ! विश्वमराजकमनायकम् ।
यदेतदप्रतीकारं ग्रस्यते यमरक्षसा ॥ १० ॥
योऽपि धर्मप्रतीकारो न सोऽपि मरणं प्रति ।
शुभां गतिं ददानस्तु प्रतिकर्तेति कीर्त्यते ॥ ११ ॥
एवं विश्वमनाकुलः कवलयन्नाब्रह्म कीटावधि
श्रान्तिं याति कथञ्चनापि न खलु त्रैलोक्यभीमो यमः ।
नैवास्य प्रतिकारकर्मणि सुराधीशोऽप्यलंभूष्णुता-
मालम्बेत शरण्यवर्जितमिदं हा ! हा ! जगत् ताम्यति ॥ १२ ॥
अशरणभावना ॥ ६४ ॥

अथ संसारभावनां श्लोकत्रयेणाह—

श्रोत्रियः श्वपचः स्वामी पत्तिर्ब्रह्मा कृमिश्च सः ।
संसारनाट्ये नटवत् संसारी हन्त ! चेष्टते ॥ ६५ ॥

संसारो नानायोनिषु सञ्चरणं स एव नाट्यं नटकर्म तत्र नटवत् नर्तकवत् संसारी जन्तुश्चेष्टते विविधां चेष्टां करोतीति । हन्तेत्यामन्त्रणे । केनोल्लेखेन चेष्टते ? श्रोत्रियो वेदपारगः स एव श्वपचो भवति, स्वामी प्रभुः स एव पत्तिर्भवति, ब्रह्मा प्रजापतिः स एव कृमिर्भवति । यथेष्टं च विध्यनुवादौ, तेन श्वपचः श्रोत्रियः, पत्तिः स्वामी, कृमिर्ब्रह्मा, इत्यपि द्रष्टव्यम् । यथा हि नाट्ये विविधवर्णकादियोगाद् भूमिकान्तरं नटाः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतिपद्यन्ते तथैव संसारी विविधकर्मोपाधिः श्रोत्रियादितां प्रतिपद्यते, न पुनरस्य तथाविधं परमार्थतो रूपमस्ति ॥ ६५ ॥

तथा—

न याति कतमां योनिं कतमां वा न मुञ्चति ।
संसारी कर्मसम्बन्धादवक्रयकुटीमिव ॥ ६६ ॥

योनिमिकेन्द्रियादिलक्षणां कतमां न याति ? सर्वामपि यातीत्यर्थः, कतमां वा योनिं न मुञ्चति ? सर्वामपि मुञ्चतीत्यर्थः, संसारी जन्तुः । कुतो हेतोरित्याह—कर्मसम्बन्धात् ; अवक्रयकुटीमिव भाटककुटीमिव । यथा हि तथाविधोपयोगहेतोर्गृहमेधी एकां कुटीं प्रविशति, उपयोगाभावे तां मुञ्चति ; उपयोगान्तराच्च कुट्यन्तरमादत्ते, परिहरति च ; एवं नियतकर्मोपभोगहेतोरेकां योनिं जन्तुः प्रविशति, तद्योग्यकर्मोपभोगानन्तरं तु तां विमुञ्चति, योन्यन्तरं तूपादत्ते पुनश्च परिहरति, न पुनर्नियतः कोऽपि योनिपरिग्रहोऽस्तीति ॥ ६६ ॥

तथा—

समस्तलोकाकाशेऽपि नानारूपैः स्वकर्मतः ।
वालाग्रमपि तन्नास्ति यन्न स्पृष्टं शरीरिभिः ॥ ६७ ॥

इहाकाशं द्विविधं—लोकाकाशमलोकाकाशं च । यत्र धर्माधर्मजीवपुद्गलानां सम्भवोऽस्ति तल्लोकाकाशम्, इतरत्त्वलोकाकाशम्, यदाह ;—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धर्मादीनां वृत्तिर्द्रव्याणां यत्र भवति तत् क्षेत्रम् ।
तैर्द्रव्यैः सह लोकस्तद्विपरीतं ह्यलोकाख्यम् ॥ १ ॥

ततः समग्रेऽपि लोकाकाशे चतुर्दशरज्ज्वात्मके वालाग्रमपि वालाग्रप्रमाणमपि तत् क्षेत्रं नास्ति यत् शरीरिभिरुत्पद्यमानैर्विपद्यमानैश्च न स्पृष्टम् । अत्र हेतुमाह—किंविशिष्टैः शरीरिभिः ? सूक्ष्मबादरप्रत्येकसाधारणैकेन्द्रियभेदतो द्वित्रिचतुष्पञ्चेन्द्रियभेदतश्च यथायोग्यं नानारूपैः । नानारूपत्वमपि कुतः ? । स्वकर्मतः, न त्वीश्वरादिप्रेरणया, यदाहुः परे—

अज्ञो जन्तुरनीशः स्यादात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ॥ १ ॥

तत्रेश्वरप्रेरणा यदि कर्मनिरपेक्षा तदा विश्वस्य वैश्वरूप्यं विलीयेत । कर्मसापेक्षतायां त्वीश्वरस्यास्वातन्त्र्यं वैफल्यं वा स्यादिति कर्मैवास्तु प्रेरकम्, किमीश्वरेण ? यदवोचाम वीतरागस्तोत्रे—

कर्मापेक्षः स चेत् तर्हि न स्वतन्त्रोऽस्मदादिवत् ।
कर्मजन्ये च वैचित्र्ये किमनेन शिखण्डिना ? ॥ १ ॥

अत्रान्तरश्लोकाः—

संसारिणश्चतुर्भेदाः श्वभ्रतिर्यग्नरामराः ।
प्रायेण दुःखबहुलाः कर्मसम्बन्धबाधिताः ॥ १ ॥
आद्येषु त्रिषु नरकेषूष्णं शीतं परेषु च ।
चतुर्थे शीतमुष्णं च दुःखं क्षेत्रोद्भवं त्विदम् ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नरकेषूष्णशीतेषु चेत् पतेल्लोहपर्वतः ।
विलीयेत विशीर्येत तदा भुवमनाप्नुवन् ॥ ३ ॥
उदीरितमहादुःखा अन्योन्येनासुरैश्च ते ।
इति त्रिविधदुःखार्त्ता वसन्ति नरकावनौ ॥ ४ ॥
समुत्पन्ना घटीयन्त्रेष्वधार्मिकसुरैर्बलात् ।
आकृष्यन्ते लघुद्वाराद् यथा सीसशलाकिकाः ॥ ५ ॥
गृहीत्वा पाणिपादादौ वज्रकण्टकसङ्कटे ।
आस्फाल्यन्ते शिलापृष्ठे वासांसि रजकैरिव ॥ ६ ॥
दारुदारं विदार्यन्ते दारुणैः क्रकचैः क्वचित् ।
तिलपेषं च पिष्यन्ते चित्रयन्त्रैः क्वचित् पुनः ॥ ७ ॥
पिपासार्त्ताः पुनस्तप्तत्रपुसीसकवाहिनीम् ।
नदीं वैतरणीं नामावतार्यन्ते वराककाः ॥ ८ ॥
छायाभिकाङ्क्षिणः क्षिप्रमसिपत्रवनं गताः ।
पत्रशस्त्रैः पतद्भिस्ते छिद्यन्ते तिलशोऽसकृत् ॥ ९ ॥
आश्लेष्यन्ते च शाल्मल्यो वज्रकण्टकसङ्कटाः ।
तप्तायःपुत्रिकाः क्वापि स्मारितान्यवधूरतम् ॥ १० ॥
संस्मार्य मांसलोलत्वमाश्यन्ते मांसमङ्गजम् ।
प्रख्याप्य मधुलौल्यं च पाय्यन्ते तापितं त्रपु ॥ ११ ॥
भ्राष्ट्रकन्दुमहाशूलकुम्भीपाकादिवेदनाः ।
अश्रान्तमनुभाव्यन्ते भृज्यन्ते च भटित्रवत् ॥ १२ ॥
छिन्नभिन्नशरीराणां पुनर्मिलितवर्ष्मणाम् ।
नेत्राद्यङ्गानि कृष्यन्ते बककङ्कादिपक्षिभिः ॥ १३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं महादुःखहताः सुखांशेनापि वर्जिताः ।
गमयन्ति बहुं कालमात्रयस्त्रिंशसागरम् ॥ १४ ॥
तिर्यग्गतिमपि प्राप्ताः सम्प्राप्यैकेन्द्रियादिताम् ।
तत्रापि पृथिवीकायरूपतां समुपागताः ॥ १५ ॥
हलादिशस्त्रैः पाट्यन्ते मृद्यन्तेऽश्वगजादिभिः ।
वारिप्रवाहैः प्लाव्यन्ते दह्यन्ते च दवाग्निना ॥ १६ ॥
व्यथ्यन्ते लवणाचाम्लमूत्रादिसलिलैरपि ।
लवणक्षारतां प्राप्ताः क्वथ्यन्ते चोष्णवारिणि ॥ १७ ॥
पच्यन्ते कुम्भकाराद्यैः कृत्वा कुम्भेष्टकादिसात् ।
चीयन्ते भित्तिमध्ये च कृत्वा कर्दमरूपताम् ॥ १८ ॥
केचिच्छाणैर्निघृष्यन्ते विपच्य क्षारमृत्पुटैः ।
टङ्कान्दुकैर्विदार्यन्ते पाट्यन्तेऽद्रिसरित्प्लवैः ॥ १९ ॥
अप्कायतां पुनः प्राप्तास्ताप्यन्ते तपनांशुभिः ।
घनीक्रियन्ते तुहिनैः संशोष्यन्ते च पांशुभिः ॥ २० ॥
क्षारेतररसाश्लेषाद् विपद्यन्ते परस्परम् ।
स्थाल्यन्तस्था विपच्यन्ते पीयन्ते च पिपासितैः ॥ २१ ॥
तेजस्कायत्वमाप्ताश्च विध्याप्यन्ते जलादिभिः ।
घनादिभिः प्रकुट्यन्ते ज्वाल्यन्ते चेन्धनादिभिः ॥ २२ ॥
वायुकायत्वमप्याप्ता हन्यन्ते व्यजनादिभिः ।
शीतोष्णादिद्रव्ययोगाद् विपद्यन्ते क्षणे क्षणे ॥ २३ ॥
प्राचीनाद्यास्तु सर्वेऽपि विराध्यन्ते परस्परम् ।
मुखादिवातैर्बाध्यन्ते पीयन्ते चोरगादिभिः ॥ २४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वनस्पतित्वं दशधा प्राप्ताः कन्दादिभेदतः ।
छिद्यन्ते चाथ भिद्यन्ते पच्यन्ते चाग्नियोगतः ॥ २५ ॥
संशोष्यन्ते निपिष्यन्ते प्लुष्यन्तेऽन्योन्यघर्षणैः ।
क्षारादिभिश्च दह्यन्ते संधीयन्ते च भोक्तृभिः ॥ २६ ॥
सर्वावस्थासु खाद्यन्ते भज्यन्ते च प्रभञ्जनैः ।
क्रियन्ते भस्मसाद् दावैरुन्मूल्यन्ते सरित्प्लवैः ॥ २७ ॥
सर्वेऽपि वनस्पतयः सर्वेषां भोज्यतां गताः ।
सर्वैः शस्त्रैः सर्वदाऽनुभवन्ति क्लेशसन्ततिम् ॥ २८ ॥
द्वीन्द्रियत्वे च ताप्यन्ते पीयन्ते पूतरादयः ।
चूर्ण्यन्ते कृमयः पादैर्भक्ष्यन्ते चटकादिभिः ॥ २९ ॥
शङ्खादयो निखन्यन्ते निकृष्यन्ते जलौकसः ।
गण्डूपदाद्याः पात्यन्ते जठरादौषधादिभिः ॥ ३० ॥
त्रीन्द्रियत्वेऽपि सम्प्राप्ते षट्पदीमत्कुणादयः ।
विमृज्यन्ते शरीरेण ताप्यन्ते चोष्णवारिणा ॥ ३१ ॥
पिपीलिकास्तु तुद्यन्ते पादैः सम्मार्जनेन च ।
अदृश्यमानाः कुन्थ्वाद्या मथ्यन्ते चासनादिभिः ॥ ३२ ॥
चतुरिन्द्रियताभाजः सरघाभ्रमरादयः ।
मधुभक्षैर्विराध्यन्ते यष्टिलोष्टादिताडनैः ॥ ३३ ॥
ताड्यन्ते तालवृन्ताद्यैर्द्राग् दंशमशकादयः ।
ग्रस्यन्ते गृहगोधाद्यैर्मक्षिकामर्कटादयः ॥ ३४ ॥
पञ्चेन्द्रिया जलचराः खादन्त्यन्योन्यमुत्सुकाः ।
धीवरैः परिगृह्यन्ते गिल्यन्ते च बकादिभिः ॥ ३५ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उत्कील्यन्ते त्वचयद्भिः प्राप्यन्ते च भटित्रताम् ।
भोक्तुकामैर्विपच्यन्ते निगाल्यन्ते वसार्थिभिः ॥ ३६ ॥
स्थलचारिषु चोत्पन्ना अबला बलवत्तरैः ।
मृगाद्याः सिंहप्रमुखैर्मार्यन्ते मांसकाङ्क्षिभिः ॥ ३७ ॥
मृगयासक्तचित्तैश्च क्रीडया मांसकाम्यया ।
नरैस्तत्तदुपायेन हन्यन्तेऽनपराधिनः ॥ ३८ ॥
क्षुधापिपासाशीतोष्णातिभारारोपणादिना ।
कशाङ्कुशप्रतोदैश्च वेदनां प्रसहन्त्यमी ॥ ३९ ॥
खेचरास्तित्तिरशुककपोतचटकादयः ।
श्येनसिञ्चानगृध्राद्यैर्ग्रस्यन्ते मांसगृध्नुभिः ॥ ४० ॥
मांसलुब्धैः शाकुनिकैर्नानोपायप्रपञ्चतः ।
संगृह्य प्रतिहन्यन्ते नानारूपैर्विडम्बनैः ॥ ४१ ॥
जलाग्निशस्त्रादिभवं तिरश्चां सर्वतो भयम् ।
कियद् वा वर्ण्यते स्वस्वकर्मबन्धनिबन्धनम् ॥ ४२ ॥
मनुष्यत्वेऽनार्यदेशे समुत्पन्नाः शरीरिणः ।
तत् तत् पापं प्रकुर्वन्ति यद् वक्तुमपि न क्षमम् ॥ ४३ ॥
उत्पन्ना आर्यदेशेऽपि चण्डालश्वपचादयः ।
पापकर्माणि कुर्वन्ति दुःखान्यनुभवन्ति च ॥ ४४ ॥
आर्यवंशसमुद्भूता अप्यनार्यविचेष्टिताः ।
दुःखदारिद्र्यदौर्भाग्यनिर्दग्धा दुःखमासते ॥ ४५ ॥
परसम्पत्प्रकर्षेणापकर्षेण स्वसम्पदाम् ।
परप्रेष्यतया दग्धा दुःखं जीवन्ति मानवाः ॥ ४६ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रुग्जरामरणैर्ग्रस्ता नीचकर्मकदर्थिताः ।
तां तां दुःखदशां दीनाः प्रपद्यन्ते दयास्पदम् ॥ ४७ ॥
जरा रुजा मृतिर्दास्यं न तथा दुःखकारणम् ।
गर्भवासो यथा घोरनरके वाससन्निभः ॥ ४८ ॥
सूचिभिरग्निवर्णाभिर्भिन्नस्य प्रतिरोम यत् ।
दुःखं नरस्याष्टगुणं तद् भवेद् गर्भवासिनः ॥ ४९ ॥
योनियन्त्राद् विनिष्क्रामन् यद् दुःखं लभते भवी ।
गर्भवासभवाद् दुःखात् तदनन्तगुणं खलु ॥ ५० ॥
बाल्ये मूत्रपुरीषाभ्यां यौवने रतचेष्टितैः ।
वार्द्धक्ये श्वासकासाद्यैर्जनो जातु न लज्जते ॥ ५१ ॥
पुरीषशूकरः पूर्वं ततो मदनगर्दभः ।
जराजरद्गवः पश्चात् कदापि न पुमान् पुमान् ॥ ५२ ॥
स्याच्छैशवे मातृमुखस्तारुण्ये तरुणीमुखः ।
वृद्धभावे सुतमुखो मूर्खो नान्तर्मुखः क्वचित् ॥ ५३ ॥
सेवाकर्षणवाणिज्यपाशुपाल्यादिकर्मभिः ।
क्षपयत्यफलं जन्म धनाशाविह्वलो जनः ॥ ५४ ॥
क्वचिच्चौर्यं क्वचिद् द्यूतं क्वचिद् नीचैर्भुजङ्गता ।
मनुष्याणामहो ! भूयो भवभ्रमनिबन्धनम् ॥ ५५ ॥
सुखित्वे कामललितैर्दुःखित्वे दैन्यरोदनैः ।
नयन्ति जन्म मोहान्धा न पुनर्धर्मकर्मभिः ॥ ५६ ॥
अनन्तकर्मप्रचयक्षयक्षममिदं क्षणात् ।
मानुषत्वमपि प्राप्ताः पापाः पापानि कुर्वते ॥ ५७ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ज्ञानदर्शनचारित्ररत्नत्रितयभाजने ।
मनुजत्वे पापकर्म स्वर्णभाण्डे सुरोपमम् ॥ ५८ ॥
संसारसागरगतेः शमिलायुगयोगवत् ।
लब्धं कथञ्चित् मानुष्यं हा ! रत्नमिव हार्यते ॥ ५९ ॥
लब्धे मानुष्यके स्वर्ग-मोक्षप्राप्तिनिबन्धने ।
हा ! नरकाय्युपायेषु कमस्तूत्तिष्ठति जनः ॥ ६० ॥
आशास्यते यत् प्रयत्नादनुत्तरसुरैरपि ।
तत् सम्प्राप्तं मनुष्यत्वं पापैः पापेषु योज्यते ॥ ६१ ॥
परोक्षं नरके दुःखं प्रत्यक्षं नरजन्मनि ।
तत्प्रपञ्चः प्रपञ्चेन किमर्थमुपवर्ण्यते ? ॥ ६२ ॥
शोकामर्षविषादेर्ष्यादैन्यादिहतबुद्धिषु ।
अमरेष्वपि दुःखस्य साम्राज्यमनुवर्तते ॥ ६३ ॥
दृष्ट्वा परस्य महतीं श्रियं प्राग्जन्मजीवितम् ।
अर्जितस्वल्पसुकृतं शोचन्ति सुचिरं सुराः ॥ ६४ ॥
विराद्धा बलिनान्येन प्रतिकर्तुं तमक्षमाः ।
तीक्ष्णेनामर्षशल्येन दोदूयन्ते निरन्तरम् ॥ ६५ ॥
न कृतं सुकृतं किञ्चिदाभियोग्यं ततो हि नः ।
दृष्टोत्तरोत्तरश्रीका विषीदन्तीति नाकिनः ॥ ६६ ॥
दृष्ट्वान्येषां विमानस्त्रीरत्नोपवनसम्पदम् ।
यावज्जीवं विपच्यन्ते ज्वलदीर्ष्यानलोर्मिभिः ॥ ६७ ॥
हा प्राणेश ! प्रभो ! देव ! प्रसीदेति सगद्गदम् ।
परैर्मुषितसर्वस्वा भाषन्ते दीनवृत्तयः ॥ ६८ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्राप्तेऽपि पुण्यतः स्वर्गे कामक्रोधभयातुराः ।
न स्वस्थतामश्नुवते सुराः कान्दर्पिकादयः ॥ ६९ ॥
अथ च्यवनचिह्नानि दृष्ट्वा दृष्ट्वा विमृश्य च ।
विलीयन्तेऽथ जल्पन्ति क्व निलीयामहे वयम् ? ॥ ७० ॥

तथाहि—

अम्लाना अपि हि मालाः सुरद्रुमसमुद्भवाः ।
म्लानीभवन्ति देवानां वदनाम्भोरुहैः समम् ॥ ७१ ॥
हृदयेन समं विष्वग् विश्लिष्यत्सन्धिबन्धनाः ।
महाबलैरप्यकम्प्याः कम्पन्ते कल्पपादपाः ॥ ७२ ॥
अकालप्रतिपन्नाभ्यां प्रियाभ्यां च सहैव हि ।
श्रीह्रीभ्यां परिमुच्यन्ते कृतागस इवामराः ॥ ७३ ॥
अम्बरश्रीरपमला मलिनीभवति क्षणात् ।
अप्यकस्माद्दिशमरैरघौघैर्मलिनैर्घनैः ॥ ७४ ॥
अदीना अपि दैन्येन विनिद्रा अपि निद्रया ।
आश्रीयन्ते मृत्युकाले पक्षाभ्यामिव कीटिकाः ॥ ७५ ॥
विषयेष्वतिरज्यन्ते न्यायधर्मविबाधया ।
अपथ्यान्यपि यत्नेन स्पृहयन्ति मुमूर्षवः ॥ ७६ ॥
नीरुजामपि भज्यन्ते सर्वाङ्गोपाङ्गसन्धयः ।
भाविदुर्गतिपातोत्थवेदनाविवशा इव ॥ ७७ ॥
पदार्थग्रहणेऽकस्माद् भवन्त्यपटुदृष्टयः ।
परेषां सम्पदुत्कर्षमिव प्रेक्षितुमक्षमाः ॥ ७८ ॥
गर्भावासनिवासोत्थदुःखागमभयादिव ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रकम्पतरलैरङ्गैर्भापयन्ते परानपि ॥ ७९ ॥
निश्चितच्यवनाश्चिह्नैर्लभन्ते न रतिं क्वचित् ।
विमाने नन्दने वाप्यामङ्गारालिङ्गिता इव ॥ ८० ॥
हा! प्रियाः! हा! विमानानि! हा वाप्यो! हा! सुरद्रुमाः! ।
क्व द्रष्टव्याः पुनर्यूयं हतदैव वियोजिताः? ॥ ८१ ॥
अहो! स्मितं सुधावृष्टिरहो! बिम्बाधरः सुधा ।
अहो! वाणी सुधावर्षिण्यहो! कान्ता सुधामयी ॥ ८२ ॥
हा! रत्नघटिताः स्तम्भाः! हा! श्रीमन्मणिकुट्टिम! ।
हा! वेदिकाः! रत्नमय्यः! कस्य यास्यथ संश्रयम्? ॥ ८३ ॥
हा! रत्नसोपानचिताः कमलोत्पलमालिताः ।
भविष्यन्त्युपभोगाय कस्येमाः पूर्णवापयः? ॥ ८४ ॥
हे! पारिजात! मन्दार! सन्तान! हरिचन्दन! ।
कल्पद्रुम! विमोक्तव्यः किं भवद्भिरयं जनः? ॥ ८५ ॥
हा! हा! स्त्रीगर्भनरके वस्तव्यमवशस्य मे ।
हहाऽशुचिरसास्वादः कर्तव्यो मयका मुहुः ॥ ८६ ॥
हहा हा! जठराङ्गारशकटीपाकसम्भवम् ।
मया दुःखं विसोढव्यं बद्धेन निजकर्मणा ॥ ८७ ॥
रतेरिव निधानानि क्व तास्ताः सुरयोषितः? ।
क्वाशुचिस्यन्दबीभत्सा भोक्तव्या नरयोषितः? ॥ ८८ ॥
एवं स्वर्लोकवस्तूनि स्मारं स्मारं दिवौकसः ।
विलपन्तः क्षणस्यान्तर्विध्यायन्ति प्रदीपवत् ॥ ८९ ॥

(नवभिः कुलकम् ॥)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं नास्ति सुखं चतुर्गतिजुषामप्यत्र संसारिणां
दुःखं केवलमेव मानसमथो शारीरमत्यायतम् ।
ज्ञात्वेवं ममतानिरासविधये ध्यायन्तु शुद्धाशया
अश्रान्तं भवभावनां भवभयच्छेदोन्मुखत्वं यदि ॥ ९० ॥

॥ संसारभावना ॥ ६७ ॥

अथैकत्वभावनां श्लोकद्वयेनाह—

एक उत्पद्यते जन्तुरेक एव विपद्यते ।
कर्माण्यनुभवत्येकः प्रचितानि भवान्तरे ॥ ६८ ॥

एकोऽसहाय उत्पद्यते शरीरसम्बन्धमनुभवति जन्तुः प्राणी, विपद्यते शरीरेण वियुज्यते, कर्माणि ज्ञानावरणीयादीनि भवान्तरे पूर्वजन्मनि प्रचितानि कृतानि अनुभवति वेदयते, भवान्तरग्रहणमुपलक्षणम्, इहजन्मकृतानामप्यनुभवात्, यदाहुर्भगवन्तः ;—[1]परलोअकडाकम्मा इहलोए वेइज्जंति, इहलोअकडा कम्मा इहलोए वेइज्जंति ॥ ६८ ॥

तथा—

अन्यैस्तेनार्जितं वित्तं भूयः संभूय भुज्यते ।
स त्वेको नरकक्रोडे क्लिश्यते निजकर्मभिः ॥ ६९ ॥

तेनैकेन जन्तुनाऽर्जितं महारम्भपरिग्रहादिनोपार्जितं वित्तमन्यैः सम्बन्धिबन्धुभृत्यप्रभृतिभिः सम्भूय मिलित्वा भूयः पुनः

(१) परलोककृतानि कर्माणि इहलोके वेद्यन्ते ।
इहलोके कृतानि कर्माणि इहलोके वेद्यन्ते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुनर्भुज्यते वित्तस्य विनियोगः क्रियते। स तु वित्तस्यार्जयिता एको भोक्तृलोकविरहितो नरकक्रोडे नरकोत्सङ्गे क्लिश्यते बाध्यते निजकर्मभिर्धनार्जनकालप्रचितैः पापकर्मभिः ॥

अत्रान्तरश्लोकाः—

दुःखदावाग्निभीष्मेऽस्मिन् वितते भवकानने ।
बम्भ्रमीत्येक एवासौ जन्तुः कर्मवशीकृतः ॥ १ ॥
ननु जीवस्य मा भूवन् सहाया बान्धवादयः ।
शरीरं तु सहायोऽस्तु सुखदुःखानुभूतिदम् ॥ २ ॥
नायाति पूर्वभवतो न याति च भवान्तरम् ।
ततः कायः सहायः स्यात् संफेटमिलितः कथम् ? ॥ ३ ॥
धर्माधर्मौ समासन्नौ सहायाविति चेद् मतिः ।
नैषा सत्या, न मोक्षेऽस्ति धर्माधर्मसहायता ॥ ४ ॥
तस्मादेको बम्भ्रमीति भवे कुर्वन् शुभाशुभे ।
जन्तुर्वेदयते चैतदनुरूपे शुभाशुभे ॥ ५ ॥
एक एव समादत्ते मोक्षश्रियमनुत्तराम् ।
सर्वसम्बन्धिविरहाद् द्वितीयस्य न सम्भवः ॥ ६ ॥
यद् दुःखं भवसम्बन्धि यत् सुखं मोक्षसम्भवम् ।
एक एवोपभुङ्क्ते तद् न सहायोऽस्ति कश्चन ॥ ७ ॥
यथैवैकस्तरन् सिन्धुं पारं व्रजति तत्क्षणात् ।
न तु हृत्पाणिपादादिसंयोजितपरिग्रहः ॥ ८ ॥
तथैव धनदेहादिपरिग्रहपराङ्मुखः ।
स्वस्थ एको भवाम्भोधेः पारमासादयत्यसौ ॥ ९ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एकः पापात् पतति नरके याति पुण्यात् स्वरेकः
पुण्यापुण्यप्रचयविगमाद् मोक्षमेकः प्रयाति ।
एवं ज्ञात्वा चिरमवितथां निर्ममत्वस्य हेतो-
रेकत्वाख्यामवहितधियो भावनां भावयन्तु ॥ १० ॥

॥ एकत्वभावना ॥ ६९ ॥

अथान्यत्वभावनामाह—

यत्रान्यत्वं शरीरस्य वैसदृश्याच्छरीरिणः ।
धनबन्धुसहायानां तत्रान्यत्वं न दुर्वचम् ॥ ७० ॥

यत्रेति प्रक्रमार्थमव्ययम् । अन्यत्वं भेदः शरीरस्य कायस्य । कस्माद् भेदः ? शरीरिण आत्मनः सकाशात् । कुतो हेतोः ? । वैसदृश्यात् । प्रतीतमेव हि वैसदृश्यं शरीरशरीरिणोर्मूर्तत्वामूर्तत्वाभ्याम्, अचेतनत्वचेतनत्वाभ्याम्, अनित्यत्वनित्यत्वाभ्याम्, भवान्तरेष्वगमनगमनाभ्यां च । तत्रेति प्रक्रमोपसंहारे, शरीरिणः सकाशादन्यत्वं न दुर्वचं न दुर्भणम् । केषाम् ? धनबन्धुसहायानां धनानां धनधान्यादिभेदैर्नवविधानाम्, बन्धूनां मातृपितृपुत्रादीनाम्, सहायानां सुहृत्-सेवक-पत्त्यादीनाम् । अयमर्थः— यो जीवात् शरीरस्योपपत्त्या भेदं ग्राहितः स धनादिभ्यो भेदं ग्राहयितुं सुशक एवेति ॥ ७० ॥

न केवलमन्यत्वभावनाया निर्ममत्वमेव फलम्, किन्तु तत्फलान्तरमप्यस्ति, तदेवाह—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योो देहधनबन्धुभ्यो भिन्नमात्मानमीक्षते ।
क्व शोकशङ्कुना तस्य हन्तातङ्कः प्रतन्यते ॥ ७१ ॥

यः प्राणी देहाद् धनाद् बन्धुभ्यश्च भिन्नमात्मानं स्वमीक्षते विवेकालोकेन, तस्य भेदप्रेक्षितुः, क्व नैवेत्यर्थः, शोकशङ्कुना शोकशल्येन, हन्तेति हर्षार्थमव्ययम्, आतङ्कः पीडा प्रतन्यते क्रियते ।

अत्रान्तरश्लोकाः—

इहान्यत्वं भवेद् भेदः स वैलक्षण्यलक्षणः ।
आत्मदेहादिभावानां साक्षादेव प्रतीयते ॥ १ ॥
देहाद्या इन्द्रियग्राह्या आत्मानुभवगोचरः ।
तदेतेषामनन्यत्वं कथं नामोपपद्यते ॥ २ ॥
आत्मदेहादिभावानां यद्यन्यत्वं स्फुटं ननु ।
ततो देहप्रहारादौ कथमात्मा प्रपीड्यते ॥ ३ ॥
सत्यं येषां शरीरादौ भेदबुद्धिर्न विद्यते ।
तेषां देहप्रहारादावात्मपीडोपजायते ॥ ४ ॥
ये तु देहात्मनोर्भेदं सम्यगेव प्रपेदिरे ।
तेषां देहप्रहारादावपि नात्मा प्रपीड्यते ॥ ५ ॥
तथाहि लोहचक्रेण चौरैर्योपचनेन च ।
देहबाधेऽप्यबाधात्मा तद्भेदज्ञोऽन्तिमो जिनः ॥ ६ ॥
नमिर्धनात्मभेदज्ञः पूर्दाहेऽपीन्द्रमब्रवीत् ।
दाहेऽपि मिथिलापुर्यां न मे किमपि दह्यते ॥ ७ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भेदं विद्वान् न पीड्येत पितृदुःखेऽप्युपस्थिते ।
आत्मीयत्वाभिमानेन भृत्यदुःखेऽपि मुह्यति ॥ ८ ॥
अस्वत्वेन गृहीतः सन् पुत्रोऽपि पर एव हि ।
स्वकीयत्वेन भृत्योऽपि स्वपुत्रादतिरिच्यते ॥ ९ ॥
ममेति मतिमाश्रिताः परतरेऽपि वस्तुन्यहो !
निबध्य दधतेतरां स्वमिह कोशकारा इव ।
विविच्य तदिदं मुहुर्वितथभावनावर्जनाद्
भजेत ममताच्छिदे सततमन्यत्वभावनाम् ॥ १० ॥

॥ अन्यत्वभावना ॥ ७१ ॥

अथाशुचित्वभावनामाह—

रसासृग्मांसमेदोऽस्थिमज्जाशुक्रान्त्रवर्चसाम् ।
अशुचीनां पदं कायः शुचित्वं तस्य तत् कुतः ? ॥७२॥

रसो भुक्तपीतान्नपानपरिणामजो निस्यन्दः, असृग् रक्तं रससम्भवो धातुः, मांसं पिशितमसृग्भवम्, मेदो वसा मांससम्भवम्, अस्थि कीकसं मेदसम्भवम्, मज्जासारोऽस्थिसम्भवः, शुक्रं रेतो मज्जासम्भवम्, अन्त्रं पुरीतत्, वर्चो विष्ठा, एतेषामशुचिद्रव्याणां पदं स्थानं कायः। तत् तस्मात् तस्य कायस्य कथं शुचित्वम्—न कथञ्चिदित्यर्थः ॥ ७२ ॥

ये त्वत्रापि शुचित्वमानिनस्तानुपालभते—

नवस्रोतःस्रवद्विस्ररसनिःस्यन्दपिच्छिले ।
देहेऽपि शौचसङ्कल्पो महन्मोहविजृम्भितम् ॥७३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नवभ्यो नेत्रश्रोत्रनासामुखपायूपस्थेभ्यः स्रोतोभ्यो निर्गमद्वारेभ्यः स्रवन् क्षरन् विस्रमामगन्धिर्योऽसौ रसस्तस्य निःस्यन्दो निर्यासस्तेन पिच्छिलो यः कायस्तस्मिन्नपि शौचसङ्कल्पः शुचित्वाभिमानो यः स महद् गुरुतरं मोहस्य विजृम्भितम् ।

अत्रान्तरश्लोकाः—

शुक्रशोणितसम्भूतो मलनिःस्यन्दवर्धितः ।
गर्भे जरायुसंछन्नः शुचिः कायः कथं भवेत् ? ॥ १ ॥
मातृजग्धान्नपानोत्थरसं नाडीक्रमागतम् ।
पायं पायं विवृद्धः सन् शौचं मन्येत कस्तनौ ? ॥ २ ॥
दोषधातुमलाकीर्णं कृमिगण्डूपदास्पदम् ।
रोगभोगिगणैर्जग्धं शरीरं को वदेत् शुचि ॥ ३ ॥
सुस्वादून्यन्नपानानि क्षीरेक्षुविकृती अपि ।
भुक्तानि यत्र विष्ठायै तच्छरीरं कथं शुचि ? ॥ ४ ॥
विलेपनार्थमासक्तः सुगन्धिर्यक्षकर्दमः ।
मलीभवति यत्राशु क्व शौचं तत्र वर्ष्मणि ? ॥ ५ ॥
जग्ध्वा सुगन्धि ताम्बूलं सुप्तो निश्युत्थितः प्रगे ।
जुगुप्सते वक्त्रगन्धं यत्र तत् किं वपुः शुचि ? ॥ ६ ॥
स्वतः सुगन्धयो गन्धधूपपुष्पस्रगादयः ।
यत्सङ्गाद् यान्ति दौर्गन्ध्यं सोऽपि कायः शुचीयते ? ॥ ७ ॥
अभ्यक्तोऽपि विलिप्तोऽपि धौतोऽपि घटकोटिभिः ।
न याति शुचितां कायः शुण्डाघट इवाशुचिः ॥ ८ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मृज्जलानलवातांशुस्नानैः शौचं वदन्ति ये ।
गतानुगतिकैस्तैस्तु विहितं तुषकण्डनम् ॥ ९ ॥

शरीरकस्यैवमशौचभावनां
मदाभिमानस्मरसाददायिनीम् ।
विभावयन् निर्ममतामहाभरं
वोढुं दृढः स्याद् बहुनोदितेन किम् ? ॥ १० ॥

॥ अशौचभावना ॥ ७३ ॥

अथास्रवभावनामाह—

मनोवाक्कायकर्माणि योगाः कर्म शुभाशुभम् ।
यदाश्रवन्ति जन्तूनामाश्रवास्तेन कीर्तिताः ॥ ७४ ॥

मनश्च वाक् च कायश्च मनोवाक्कायास्तेषां कर्माणि व्यापारा योगशब्देनोच्यन्ते ; तत्रात्मना शरीरवता सर्वप्रदेशैर्गृहीता मनोयोग्याः पुद्गलाः शुभादिमननार्थं करणभावमालम्बन्ते, तत्सम्बन्धादात्मनः पराक्रमविशेषो मनोयोगः। स च पञ्चेन्द्रियाणां समनस्कानां भवति। तथा, आत्मना शरीरवता वाग्योग्यपुद्गला गृहीता विसृज्यमाना वाक्त्वेन करणतामापद्यन्ते, तेन वाक्करणेन सम्बन्धादात्मनो भाषणशक्तिर्वाग्योगः। सा च द्वीन्द्रियादीनाम्। कायः शरीरमात्मनो निवासस्तद्योगाज्जीवस्य वीर्यपरिणामः काययोगः। ते चामी त्रयोऽपि मनोवाक्कायसम्बन्धादग्निसम्बन्धादिष्टकादे रक्ततेवात्मनो वीर्यपरिणतिविशेषा योगा इत्युच्यन्ते, यदाह ;—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]योगो वीरिअं थामो उच्छाह परिक्कमो तहा चेट्ठा।
सत्ती सामत्थं चिअ जोगस्स हवंति पज्जाया ॥ १ ॥

एते च स्थविरस्य दुर्बलस्य वा आलम्बनयष्ट्यादिवज्जीवस्योपग्राहकाः। तत्र मनोयोग्यपुद्गलात्मप्रदेशपरिणामो मनोयोगः, भाषायोग्यपुद्गलात्मप्रदेशपरिणामो वाग्योगः, काययोग्यपुद्गलात्मप्रदेशपरिणामो गमनादिक्रियाहेतुः काययोगः। एते योगाः, यस्मात् शुभं सद्वेद्यादि, अशुभमसद्वेद्यादि कर्माश्रवन्ति प्रस्नुवते, तेन कारणेनाश्रवा इति कीर्तिताः, आस्रूयते कर्मभिरित्याश्रवाः। एतेषां च करणभूतानामपि कर्तृत्वमिहोक्तम्, स्वातन्त्र्यविवक्षणात्, यथा असिश्छिनत्ति इति ॥ ७४ ॥

'योगाः कर्म शुभाशुभमाश्रवन्ति' इत्युक्तम्, कार्याणां च कारणानुकारित्वं दृष्टम्, इति शुभानां शुभकर्महेतुत्वम्, अशुभानामशुभकर्महेतुत्वं च विवेकेन दर्शयति—

मैत्र्यादिवासितं चेतः कर्म सूते शुभात्मकम्।
कषायविषयाक्रान्तं वितनोत्यशुभं पुनः ॥ ७५ ॥

मैत्रीमुदिताकरुणोपेक्षालक्षणाभिश्चतसृभिर्भावनाभिर्वासितं भावितं चेतो मनः कर्तृ, शुभात्मकं पुण्यात्मकं कर्म सूते। तच्च सद्वेद्य-सम्यक्त्व-हास्य-रति-पुरुषवेद-शुभायु-र्नाम-गोत्र-लक्षणम्। तदेव मनः, कषायाः क्रोधादयो, विषिण्वन्ति बध्नन्ति संसारिणं

---

(१) योगो वीर्यं स्थामोत्साहः पराक्रमस्तथा चेष्टा।
शक्तिः सामर्थ्यमेव योगस्य भवन्ति पर्यायाः ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

काम्यमानाः सन्त इन्द्रियार्थाः स्पर्शादयो विषयाः, कषायाश्च विषयाश्च तैराक्रान्तं वशीकृतं वितनोति करोत्यशुभमसद्वेद्यादि कर्म ॥ ७५ ॥

तथा—

शुभार्जनाय निर्मिथ्यं श्रुतज्ञानाश्रितं वचः ।
विपरीतं पुनर्ज्ञेयमशुभार्जनहेतवे ॥ ७६ ॥

निर्मिथ्यमवितथम्, तच्च जैनमेव वचनं भवतीत्याह—श्रुतज्ञानाश्रितं वचः, श्रुतज्ञानं द्वादशाङ्गं गणिपिटकं तदाश्रितं तदविरोधेन वर्तमानं वचो वाग्योगः स शुभस्य कर्मणोऽर्जनाय। तदेव वचो विपरीतं मिथ्या श्रुतज्ञानविरोधि चाशुभस्य कर्मणोऽर्जनाय ॥ ७६ ॥

तथा—

शरीरेण सुगुप्तेन शरीरी चिनुते शुभम् ।
सततारम्भिणा जन्तुघातकेनाशुभं पुनः ॥ ७७ ॥

शरीरेण कायेन सुगुप्तेनासच्चेष्टारहितेन कायोत्सर्गाद्यवस्थायां निश्चेष्टेन शरीरी जन्तुश्चिनुते करोति शुभं सद्वेद्यादि कर्म। सततारम्भिणा पुनर्महारम्भिणा अत एव जन्तुघातकेन प्राणिव्यापादकेनाशुभं कर्मासद्वेद्यादि चिनोति। इति शुभाशुभयोगमूलत्वेन शुभाशुभकर्मणां जन्मप्रतिपादनाद् न कार्यकारणभावविरोधः ॥ ७७ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शुभयोगानां शुभफलहेतुत्वं प्रसङ्गादुक्तम्। भावनाप्रकरणे त्वशुभयोगानामशुभफलहेतुत्वं वैराग्योत्पादनाय प्रतिपादनीयम्, इत्युक्तानुक्तानशुभहेतून् संगृह्णाति—

कषाया विषया योगाः प्रमादाविरती तथा।
मिथ्यात्वमार्तरौद्रे चेत्यशुभं प्रति हेतवः॥ ७८॥

कषायाः क्रोध-मान-माया-लोभलक्षणाः, नोकषायाश्च कषाय-सहचरिता हास्यरत्यरतिभयशोकजुगुप्सापुंस्त्रीनपुंसकवेदलक्षणा नव कषायशब्देन गृह्यन्ते, विषयाः काम्यमानाः स्पर्शादयः, योगा मनोवाक्कायकर्मलक्षणाः, प्रमादोऽज्ञान-संशय-विपर्यय-राग-द्वेष-स्मृतिभ्रंश-धर्मानादर-योगदुष्प्रणिधानभेदैरष्टधा, अवि-रतिर्नियमाभावः, मिथ्यात्वं मिथ्यादर्शनम्, आर्त-रौद्रे ध्यान-भेदावुक्तपूर्वौ, इत्येतेऽशुभं कर्म प्रति हेतवः। नन्वेते बन्धं प्रति हेतुत्वेनोक्ताः, यद् वाचकमुख्याः;—मिथ्यादर्शनाविरति-प्रमादकषाययोगा बन्धहेतवः इति. तत् किमास्रवभावनायां बन्धहेतूनामेतेषामभिधानम्?। सत्यम्, आस्रवभावनेव बन्ध-भावनापि न महद्भिर्भावनात्वेनोक्ता, आस्रवभावनयैव गतार्थत्वात्। आस्रवेण ह्युपात्ताः कर्मपुद्गला आत्मना सम्बध्यमाना बन्ध इत्य-भिधीयते, यदाह;—सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गला-नादत्ते स बन्धः इति। ततश्च बन्धास्रवयोर्भेदो न विवक्षितः। ननु कर्मपुद्गलैः सह क्षीरनीरन्यायेनात्मनः सम्बन्धो बन्ध उच्यते, तत् कथमास्रव एव बन्धः?। युक्तमेतत्, तथाप्यास्रवेणानु-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पात्तानां कर्मपुद्गलानां कथं बन्धः स्यात् ?। इत्यतोऽपि कर्मपुद्गलादानहेतावाश्रवे बन्धहेतूनामभिधानमदुष्टम्। ननु तथापि बन्धहेतूनां पाठो निरर्थकः। नैवम्, बन्धाश्रवयोरेकत्वेनोक्तत्वात्, आश्रवहेतूनामेवायं पाठ इति सर्वमवदातम्।

अत्रान्तरश्लोकाः—

यः कर्मपुद्गलादानहेतुः प्रोक्तः स आश्रवः।
कर्माणि चाष्टधा ज्ञानावरणीयादिभेदतः॥ १॥
ज्ञानदर्शनयोस्तद्वत् तद्धेतूनां च ये किल।
विघ्ननिह्नवपैशून्याशातनाघातमत्सराः॥ २॥
ते ज्ञानदर्शनाचारकर्महेतव आश्रवाः।
देवपूजा गुरूपास्तिः पात्रदानं दया क्षमा॥ ३॥
सरागसंयमो देशसंयमोऽकामनिर्जरा।
शौचं बालतपश्चेति सद्वेद्यस्य स्युराश्रवाः॥ ४॥
दुःखशोकवधास्तापाक्रन्दने परिदेवनम्।
स्वान्योभयस्थाः स्युरसद्वेद्यस्यामी इहाश्रवाः॥ ५॥
वीतरागे श्रुते संघे धर्मे सर्वसुरेषु च।
अवर्णवादिता तीव्रमिथ्यात्वपरिणामिता॥ ६॥
सर्वज्ञसिद्धदेवापह्नवो धार्मिकदूषणम्।
उन्मार्गदेशनाऽनर्थाग्रहोऽसंयतपूजनम्॥ ७॥
असमीक्षितकारित्वं गुर्वादिष्ववमानना।
इत्यादयो दृष्टिमोहस्याश्रवाः परिकीर्तिताः॥ ८॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कषायोदयतस्तीव्रः परिणामो य आत्मनः ।
चारित्रमोहनीयस्य स आस्रव उदीरितः ॥ ९ ॥
उत्प्रासनं सकन्दर्पोपहासो हासशीलता ।
बहुप्रलापो दैन्योक्तिर्हास्यस्यामी स्युरास्रवाः ॥ १० ॥
देशादिदर्शनौत्सुक्यं चित्रे रमणखेलने ।
परचित्तावर्जनं चेत्यास्रवाः कीर्तिता रतेः ॥ ११ ॥
असूया पापशीलत्वं परेषां रतिनाशनम् ।
अकुशलप्रोत्साहनं चारतेरास्रवा अमी ॥ १२ ॥
स्वयं भयपरीणामः परेषामथ भापनम् ।
त्रासनं निर्दयत्वं च भयं प्रत्यास्रवा अमी ॥ १३ ॥
परशोकाविष्करणं स्वशोकोत्पादशोचने ।
रोदनादिप्रसक्तिश्च शोकस्यैते स्युरास्रवाः ॥ १४ ॥
चतुर्वर्णस्य सङ्घस्य परिवादजुगुप्सने ।
सदाचारजुगुप्सा च जुगुप्सायाः स्युरास्रवाः ॥ १५ ॥
ईर्ष्याविषयगार्द्ध्ये च मृषावादोऽतिवक्रता ।
परदाररतासक्तिः स्त्रीवेदस्यास्रवा इमे ॥ १६ ॥
स्वदारमात्रसन्तोषोऽनीर्ष्या मन्दकषायता ।
अवक्राचारशीलत्वं पुंवेदस्यास्रवा इति ॥ १७ ॥
स्त्रीपुंसानङ्गसेवोग्राः कषायास्तीव्रकामता ।
पाखण्डस्त्रीव्रतभ्रंशः षण्ढवेदास्रवा अमी ॥ १८ ॥
साधूनां गर्हणा धर्मोन्मुखानां विघ्नकारिता ।
मधुमांसविरतानामविरत्यभिवर्णनम् ॥ १९ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विरताविरतानां चान्तरायकरणं मुहुः ।
अचारित्रगुणाख्यानं तथा चारित्रदूषणम् ॥ २० ॥
कषायनोकषायाणामन्यस्थानामुदीरणम् ।
चारित्रमोहनीयस्य सामान्येनास्रवा अमी ॥ २१ ॥
पञ्चेन्द्रियप्राणिवधो बह्वारम्भपरिग्रहौ ।
निरनुग्रहता मांसभोजनं स्थिरवैरता ॥ २२ ॥
रौद्रध्यानं मिथ्यात्वानन्तानुबन्धिकषायता ।
कृष्णनीलकापोताश्च लेश्या अनृतभाषणम् ॥ २३ ॥
परद्रव्यापहरणं मुहुर्मैथुनसेवनम् ।
अवशेन्द्रियता चेति नारकायुष आस्रवाः ॥ २४ ॥
उन्मार्गदेशना मार्गप्रणाशो मूढचित्तता ।
आर्तध्यानं सशल्यत्वं मायारम्भपरिग्रहौ ॥ २५ ॥
शीलव्रते सातिचारे नीलकापोतलेश्यता ।
अप्रत्याख्यानाः कषायास्तिर्यगायुष आस्रवाः ॥ २६ ॥
अल्पौ परिग्रहारम्भौ सहजे मार्दवार्जवे ।
कापोतपीतलेश्यत्वं धर्मध्यानानुरागिता ॥ २७ ॥
प्रत्याख्यानकषायत्वं परिणामश्च मध्यमः ।
संविभागविधायित्वं देवतागुरुपूजनम् ॥ २८ ॥
पूर्वालापप्रियालापौ सुखप्रज्ञापनीयता ।
लोकयात्रासु माध्यस्थ्यं मानुषायुष आस्रवाः ॥ २९ ॥
सरागसंयमो देशसंयमोऽकामनिर्जरा ।
कल्याणमित्रसम्पर्को धर्मश्रवणशीलता ॥ ३० ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पात्रे दानं तपःश्रद्धा रत्नत्रय्याविराधना।
मृत्युकाले परीणामो लेश्ययोः पद्मपीतयोः ॥ ३१ ॥
बालतपोऽग्नितोयादिसाधनोल्लम्बनानि च ।
अव्यक्तसामायिकता देवस्यायुष आस्रवाः ॥ ३२ ॥
मनोवाक्कायवक्रत्वं परेषां विप्रतारणम् ।
मायाप्रयोगो मिथ्यात्वं पैशून्यं चलचित्तता ॥ ३३ ॥
सुवर्णादिप्रतिच्छन्दकरणं कूटसाक्षिता ।
वर्णगन्धरसस्पर्शाद्यन्यथापादनानि च ॥ ३४ ॥
अङ्गोपाङ्गच्यावनानि यन्त्रपञ्जरकर्म्म च ।
कूटमानतुलाकर्मान्यनिन्दात्मप्रशंसनम् ॥ ३५ ॥
हिंसानृतस्तेयाब्रह्ममहारम्भपरिग्रहाः ।
परुषासभ्यवचनं शुचिवेषादिना मदः ॥ ३६ ॥
मौखर्याक्रोशौ सौभाग्योपघातः कार्मणक्रिया ।
परकौतूहलोत्पादः परिहासविडम्बना ॥ ३७ ॥
वेश्यादीनामलङ्कारदानं दावाग्निदीपनम् ।
देवादिव्याजाद् गन्धादिचौर्यं तीव्रकषायता ॥ ३८ ॥
चैत्यप्रतिश्रयारामप्रतिमानां विनाशनम् ।
अङ्गारादिक्रिया चैत्यशुभस्य नाम्न आस्रवाः ॥ ३९ ॥
एते एवान्यथारूपास्तथा संसारभीरुता ।
प्रमादहानं सद्भावार्पणं चान्यादयोऽपि च ॥ ४० ॥
दर्शने धार्मिकाणां च संभ्रमः स्वागतक्रिया ।
आस्रवाः शुभनाम्नोऽथ तीर्थकृन्नाम्न आस्रवाः ॥ ४१ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भक्तिरर्हत्सु सिद्धेषु गुरुषु स्थविरेषु च ।
बहुश्रुतेषु गच्छे च श्रुतज्ञाने तपस्विषु ॥ ४२ ॥
आवश्यके व्रतशीलेष्वप्रमादो विनीतता ।
ज्ञानाभ्यासस्तपस्त्यागौ मुहुर्ध्यानं प्रभावना ॥ ४३ ॥
संघे समाधिजननं वैयावृत्त्यं च साधुषु ।
अपूर्वज्ञानग्रहणं विशुद्धिर्दर्शनस्य च ॥ ४४ ॥
आद्यन्ततीर्थनाथाभ्यामिति विंशतिरास्रवाः ।
एको द्वौ वा त्रयः सर्वे चान्यैः स्पृष्टा जिनेश्वरैः ॥ ४५ ॥
परस्य निन्दावज्ञोपहासाः सद्गुणलोपनम् ।
सदसद्दोषकथनमात्मनस्तु प्रशंसनम् ॥ ४६ ॥
सदसद्गुणशंसा च स्वदोषाच्छादनं तथा ।
जात्यादिभिर्मदश्चेति नीचैर्गोत्रास्रवा अमी ॥ ४७ ॥
नीचैर्गोत्रास्रवविपर्यासो विगतगर्वता ।
वाक्कायचित्तैर्विनय उच्चैर्गोत्रास्रवा अमी ॥ ४८ ॥
दाने लाभे च वीर्ये च तथा भोगोपभोगयोः ।
सव्याजाव्याजविघ्नोऽन्तरायकर्मण आस्रवाः ॥ ४९ ॥

प्रस्तावतः खलु शुभास्रव एष उक्तो
वैराग्यकारणमसौ न तु देहभाजाम् ।
ज्ञात्वा तदेवमशुभास्रव एव भाव्यो
भव्यैर्जनैः सपदि निर्ममतानिमित्तम् ॥ ५० ॥

॥ आस्रवभावना ॥ ७८ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ संवरभावनामाह—

सर्वेषामाश्रवाणां तु निरोधः संवरः स्मृतः।
स पुनर्भिद्यते द्वेधा द्रव्यभावविभेदतः॥ ७९ ॥

सर्वेषां पूर्वोक्तानामाश्रवाणां निरुध्यन्तेऽनेनेति निरोधः संवर उक्तः संव्रियतेऽनेनेति कृत्वा। स चायोगिकेवलिनामेव। इदं च सर्वसंवरस्य स्वरूपम्। एकद्वित्र्याद्यास्रवनिरोधस्तु सामर्थ्याद् देशसंवरः। स चायोगिकेवलिनः प्राग्गुणस्थानकेषु। सर्वसंवरो देशसंवरश्च प्रत्येकं द्रव्यभावभेदेन द्विविधः॥ ७९ ॥

द्वैविध्यमेवाह—

यः कर्मपुद्गलादानच्छेदः स द्रव्यसंवरः।
भवहेतुक्रियात्यागः स पुनर्भावसंवरः॥ ८० ॥

कर्मपुद्गलानामाश्रवद्वारेणादानं प्रवेशनं तस्य यच्छिद्यतेऽनेनेति च्छेदः स द्रव्याणां संवरो द्रव्यसंवरः। भावसंवरस्तु संसारकारणभूतायाः क्रियाया आत्मव्यापाररूपायास्त्याग इति॥ ८० ॥

इदानीं कषाया विषया योगा इत्यादिनाऽभिहितानामशुभकर्महेतूनां प्रतिपक्षभूतानुपायान् स्तौति—

येन येन ह्युपायेन रुध्यते यो य आश्रवः।
तस्य तस्य निरोधाय स स योज्यो मनीषिभिः॥८१॥

स्पष्टः॥ ८१ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उपायानाह—

क्षमया मृदुभावेन ऋजुत्वेनाऽप्यनीहया ।
क्रोधं मानं तथा मायां लोभं रुन्ध्याद् यथाक्रमम् ॥८२॥

क्षमया प्रतिपक्षभूतया क्रोधम्, मृदुभावेन मानम्, ऋजुत्वेन मायाम्, अनीहया लोभं निरुन्ध्यात् संवरार्थं कृतोद्यम इति चतुर्थश्लोकपदेन योगः ॥ ८२ ॥

कषायाणां प्रतिपक्षतः क्षयमुक्त्वा विषयाणामाह—

असंयमकृतोत्सेकान् विषयान् विषसंनिभान् ।
निराकुर्यादखण्डेन संयमेन महामतिः ॥ ८३ ॥

असंयमेनेन्द्रियोन्मादेन कृत उत्सेकः स्वकार्यजननं प्रति सामर्थ्यं येषां तान् विषयान् स्पर्शादीन्, किंविशिष्टान्? विषसंनिभान् आपातरम्यत्वेन परिणामदारुणत्वेन च विषतुल्यान्, निराकुर्याद् निवारयेत्। केन?। संयमेनेन्द्रियजयेन। किंविशिष्टेन?। अखण्डेनाप्रतिहतेन ॥ ८३ ॥

इदानीं योगप्रमादाविरतीनां प्रतिपक्षानाह—

तिसृभिर्गुप्तिभिर्योगान् प्रमादं चाप्रमादतः ।
सावद्ययोगहानेनाविरतिं चापि साधयेत् ॥ ८४ ॥

गुप्तिभिर्मनोवाक्कायरक्षणलक्षणाभिः, तिसृभिरिति तासां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संख्यावचनम्, योगान् मनोवाक्कायव्यापारलक्षणान्; प्रमादं मद्यविषयकषायनिद्राविकथालक्षणं पञ्चविधम्, अज्ञानसंशयविपर्ययरागद्वेषस्मृतिभ्रंशधर्मानादरयोगदुष्प्रणिधानरूपतयाऽष्टविधं वाऽप्रमादेन तत्प्रतिपक्षभूतेन साधयेत्; सावद्या ये योगा व्यापारास्तेषां हानेन त्यागेनाविरतिमनियमं साधयेत् ॥ ८४ ॥

इदानीं मिथ्यात्वार्तरौद्रध्यानानां प्रतिपक्षानाह—

सद्दर्शनेन मिथ्यात्वं शुभस्थैर्येण चेतसः ।
विजयेतार्तरौद्रे च संवरार्थं कृतोद्यमः ॥ ८५ ॥

सद्दर्शनेन सम्यग्दर्शनेन मिथ्यात्वं मिथ्यादर्शनं विजयेत, शुभं धर्मशुक्लध्यानरूपं यच्चेतसः स्थैर्यं तेनार्तरौद्रध्याने विजयेत संवरार्थं संवरनिमित्तं कृतोद्यमः प्रयत्नवान् योगी ।

अत्रान्तरश्लोकाः—

यथा चतुष्पथस्थस्य बहुद्वारस्य वेश्मनः ।
अनावृतेषु द्वारेषु रजः प्रविशति ध्रुवम् ॥ १ ॥
प्रविष्टं स्नेहयोगाच्च तन्मयत्वेन बध्यते ।
न विशेन्न च बध्येत द्वारेषु स्थगितेषु तु ॥ २ ॥
यथा वा सरसि क्वापि सर्वैर्द्वारैर्विशेज्जलम् ।
तेषु तु प्रतिरुद्धेषु प्रविशेद् न मनागपि ॥ ३ ॥
यथा वा यानपात्रस्य मध्यैरन्ध्रैर्विशेज्जलम् ।
कृते रन्ध्रपिधाने तु न स्तोकमपि तद् विशेत् ॥ ४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योगादिष्वास्रवद्वारेष्वेवं रुद्धेषु सर्वतः ।
कर्मद्रव्यप्रवेशो न जीवे संवरशालिनि ॥ ५ ॥
संवरादास्रवद्वारनिरोधः संवरः पुनः ।
क्षान्त्यादिभेदाद् बहुधा तथैव प्रतिपादितः ॥ ६ ॥
गुणस्थानेषु यो यः स्यात् संवरः स स उच्यते ।
मिथ्यात्वानुदयादुत्तरेषु मिथ्यात्वसंवरः ॥ ७ ॥
तथा देशविरत्यादौ स्यादविरतिसंवरः ।
अप्रमत्तसंयतादौ प्रमादसंवरो मतः ॥ ८ ॥
प्रशान्तक्षीणमोहादौ भवेत् कषायसंवरः ।
अयोगाख्यकेवलिनि सम्पूर्णो योगसंवरः ॥ ९ ॥
एवमास्रवनिरोधकारणं संवरः प्रकटितः प्रपञ्चतः ।
भावनागणशिरोमणिस्त्वयं भावनीय इह भव्यजन्तुभिः ॥ १० ॥

॥ संवरभावना ॥ ८५ ॥

अथ निर्जराभावनामाह—

संसारबीजभूतानां कर्मणां जरणादिह ।
निर्जरा, सा स्मृता द्वेधा सकामा कामवर्जिता ॥८६॥

जन्तूनां चतुर्गतिभ्रमणरूपस्य संसारस्य बीजभूतानां कारणभूतानां कर्मणां जरणादात्मप्रदेशेभ्योऽनुभूतरसकर्मपुद्गलपरिशाटनादिह प्रवचने निर्जरोच्यते। सा निर्जरा द्वेधा—सह कामेन 'निर्जरा मे भूयात्' इत्यभिलाषेण युक्ता सकामा, न पुनरिहलोकपरलोकफलादिकामेन युक्ता, तस्य प्रतिषिद्धत्वात्,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यदाहुः ;—'नो इहलोगट्ठयाए तवमहिट्ठिज्जा, नो परलोगट्ठयाए तवमहिट्ठिज्जा, नो कित्तिवरमसद्दसिलोगट्ठयाए तवमहिट्ठिज्जा नन्नत्थ निज्जरट्ठयाए तवमहिट्ठिज्जा इत्येका निर्जरा। द्वितीया तु कामवर्जिता कामेन पूर्वोक्तेन वर्जिता। अत्र चकारमन्तरेणापि समुच्चयो गम्यते, इति चकारो नोक्तः, यथा—

अहरहर्नयमानो गामश्वं पुरुषं पशुम्।
वैवस्वतो न तृप्यति सुराया इव दुर्मदी ॥ १ ॥ ८६ ॥

उभयीमपि निर्जरां व्याचष्टे—

ज्ञेया सकामा यमिनामकामा त्वन्यदेहिनाम्।
कर्मणां फलवत् पाको यदुपायात् स्वतोऽपि हि ॥८७॥

सकामा निर्जराऽभिलाषवती यमिनां यतीनां विज्ञेया। ते हि कर्मक्षयार्थं तपस्तप्यन्ते। अकामा तु कर्मक्षयलक्षणफल-निरपेक्षा निर्जराऽन्यदेहिनां यतिव्यतिरिक्तानामेकेन्द्रियादीनां प्राणिनाम् ; तथाहि—एकेन्द्रियाः पृथिव्यादयो वनस्पतिपर्यन्ताः शीतोष्णवर्षाजलाग्निशस्त्राद्यभिघातच्छेदभेदादिनाऽसद्वेद्यं कर्मा-नुभूय नीरसं कर्म स्वप्रदेशेभ्यः परिशाटयन्ति। विकलेन्द्रियाश्च क्षुत्पिपासाशीतोष्णादिभिः, पञ्चेन्द्रियतिर्यञ्चश्च छेदभेददाहशस्त्रा-

---

(१) नो इहलोकार्थं तपोऽधितिष्ठेत्, नो परलोकार्थं तपोऽधितिष्ठेत्। नो कीर्त्तिवर्णशब्दश्लोकार्थं तपोऽधितिष्ठेत्, न त्वन्यत्र निर्जरार्थात् तपोऽधितिष्ठेत्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दिभिः, नारकाश्च त्रिविधया वेदनया, मनुष्याश्च क्षुत्-पिपासा-व्याधि-दारिद्र्यादिना, देवाश्च पराभियोग-किल्बिषत्वादिनाऽसद्वेद्यं कर्मानुभूय स्वप्रदेशेभ्यः परिशाटयन्ति। इत्येषामकामा निर्जरा। ननु सकामत्वाकामत्वस्वरूपेण निर्जराया द्वैविध्यं कुत्र दृष्टम्? इति प्रश्ने स्पष्टं दृष्टान्तमाह—कर्मणामसद्वेद्यादीनां फलवत् फलानामिव यद् यस्मात् पाक उपायाद् निवातप्रदेश-पलालाच्छादनादिरूपात् स्वतोऽपि वा वृक्षस्थानामिव। तदेवं यथा फलानां पाकस्य स्वत उपायतश्च द्वैविध्यं दृश्यते तद्वत् कर्मणामपि, इत्युक्तम्—सकामा कामवर्जिता च निर्जरा इति। ननु फलपाकस्य द्वैविध्ये कर्मणां पाकस्य किमायातम्?। नैवम्, पाकस्य निर्जरारूपत्वात्। ततो यथा फलपाको द्वेधा भवति तथा कर्मनिर्जरापि ॥ ८७ ॥

अथ सकामनिर्जराया हेतुं स्पष्टदृष्टान्तेनाह—

सदोषमपि दीप्तेन सुवर्णं वह्निना यथा।
तपोऽग्निना तप्यमानस्तथा जीवो विशुध्यति ॥८८॥

सदोषमपि कीटिकादिदोषयुक्तमपि सुवर्णं दीप्तेन वह्निना तप्यमानं यथा विशुध्यति तथा जीवोऽप्यसद्वेद्यादिकर्मदोषयुक्त-स्तपोऽग्निना तप्यमानो विशुध्यति। तपस्तु तप्यन्ते रसादिधातवः कर्माणि चानेनेत्यन्वयात्, यदाह—

रसरुधिरमांसमेदोऽस्थिमज्जाशुक्राण्यनेन तप्यन्ते।
कर्माणि चाशुभानीत्यतस्तपो नाम नैरुक्तम् ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तच्च निर्जराहेतुः, यदाह ;—

यद्वद् विशोषणादुपचितोऽपि यत्नेन जीर्यते दोषः ।
तद्वत् कर्मोपचितं निर्जरयति संवृतस्तपसा ॥ १ ॥ ८८ ॥

तच्च बाह्याभ्यन्तरभेदेन द्विविधम्, तत्र बाह्यं तपस्तावद् भेदेनाह—

अनशनमौनोदर्यं वृत्तेः संक्षेपणं तथा ।
रसत्यागस्तनुक्लेशो लीनतेति बहिस्तपः ॥ ८९ ॥

अशनमाहारस्तत्परित्यागोऽनशनम् । तद् द्विधा—इत्वरं यावज्जीविकं च । इत्वरं नमस्कारसहितादि श्रीमन्महावीरतीर्थे षण्मासपर्यन्तम्, श्रीनाभेयतीर्थे तु संवत्सरपर्यन्तम्, मध्यमतीर्थकरतीर्थेषु त्वष्टौ मासान् यावत् । यावज्जीविकं तु पादपोपगमनेङ्गिनीभक्तप्रत्याख्यानभेदात् त्रिविधम् । तत्र पादपोपगमनं द्विधा—सव्याघातमव्याघातं च । तत्र सतोऽप्यायुषः समुपजातव्याधिविधुरेणोत्पन्नमहावेदनेन वा देहिना यदुत्क्रान्तिः क्रियते तत् सव्याघातम् । निर्व्याघातं तु—

'निप्फाइआ य सीसा गच्छो परिपालिओ महाभागो ! ।
अब्भुज्जिओ विहारो अहवा अब्भुज्जयं मरणं ॥ १ ॥

इति दशावयःपरिणामे सति त्रस-स्थावरविरहिते स्थण्डिले पादपवद् निश्चेष्टस्य येन तेन संस्थानेन प्रशस्तध्यानव्यापृतान्तः-

(१) निष्पादिताश्च शिष्या गच्छः परिपालितो महाभाग ! ।
अभ्युद्यतो विहारोऽथवाऽभ्युद्यतं मरणम् ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करणस्य प्राणोत्क्रान्तिं यावदवस्थितिरिति। तदेतद् द्विविध-मपि पादपोपगमनम्। इङ्गिनी श्रुतविहित: क्रियाविशेषस्तद्-विशिष्टमनशनमिङ्गिनी। अस्य प्रतिपत्ता तेनैव क्रमेणायुषः परिहाणिमवबुध्य तथाविध एव स्थण्डिले एकाकी कृतचतुर्विधा-हारप्रत्याख्यानश्छायात उष्णमुष्णाच्छायां संक्रामन् सचेष्टः सम्यग्-ध्यानपरायणः प्राणान् जहाति। इत्येतदिङ्गिनीरूपमनशनम्। यस्तु गच्छमध्यवर्ती समाश्रितमृदुसंस्तारकः समुत्सृष्टशरीरोप-करणममत्वस्त्रिविधं चतुर्विधं वाऽऽहारं प्रत्याख्याय स्वयमेवो-द्ग्राहितनमस्कारः समीपवर्त्तिसाधुदत्तनमस्कारो वोद्वर्त्तन-परि-वर्तनादि कुर्वाणः समाधिना कालं करोति, तस्य भक्तप्रत्याख्यान-मनशनम्।

अथौनोदर्यम्—ऊनमवमम् उदरं यस्य स ऊनोदरस्तस्य भाव औनोदर्य्यम्। तच्च चतुर्धा-अल्पाहारौनोदर्य्यम्, उपार्धौनोदर्य्यम्, अर्धौनोदर्य्यम्, प्रमाणप्राप्तात् किञ्चिदूनौनोदर्य्यं च। तत्राहारः पुंसो द्वात्रिंशत्कवलप्रमाणः। कवलश्चोत्कृष्टापकृष्टौ वर्जयित्वा मध्यम इह गृह्यते। स चाविकृतस्वमुखविवरप्रमाणः। तत्र कवलाष्टकाभ्यवहारोऽल्पाहारौनोदर्य्यम्। अर्धस्य समीपमुपार्धं द्वादश कवलाः, यतः कवलचतुष्टयप्रक्षेपात् सम्पूर्णमर्धं भवति, ततो द्वादश कवला उपार्धौनोदर्यम्। षोडश कवला अर्धौनोदर्य्यम्। प्रमाणप्राप्त आहारो द्वात्रिंशत् कवलाः, स चैकादिकवलैरून-श्चतुर्विंशतिकवलान् यावत् प्रमाणप्राप्तात् किञ्चिदूनौनोदर्य्यम्। चतुर्विधेऽप्यस्मिन्नेकैककवलहानेन बहूनि स्थानानि जायन्ते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वाणि चामून्यौनोदर्य्यविशेषाः। योषितस्तु अष्टाविंशतिकवलाहारप्रमाणम्, यदाह ;—

'बत्तोसं खलु कवला आहारो कुच्छिपूरओ भणिओ।
पुरिसस्स, महिलिआए अट्ठावीसं भवे कवला॥ १॥

तस्याः पुरुषानुसारेण न्यूनाहारादिकं भावनीयम्।

तथा, वर्त्ततेऽनयेति वृत्तिर्भैक्ष्यम्, तस्याः संक्षेपणं ह्रासः। तच्च दत्तिपरिमाणरूपम्। एकद्वित्र्याद्यगारनियमो रथ्याग्रामार्धग्रामनियमश्च। अत्रैव द्रव्य-क्षेत्र-काल-भावाभिग्रहा अन्तर्भूताः।

तथा, रसानां मतुलोपाद् विशिष्टरसवतां वृष्याणां विकारहेतूनाम्, अतएव विकृतिशब्दवाच्यानां मद्यमांसमधुनवनीतानां दुग्ध-दधि-घृत-तैल-गुडा-अवगाह्यादीनां च त्यागो वर्जनं रसत्यागः।

तथा, तनुः कायस्तस्याः क्लेशः शास्त्राविरोधेन बाधनं तनुक्लेशः। ननु तनोरचेतनत्वात् कथं क्लेशसम्भवः?। उच्यते—शरीर-शरीरिणोः क्षीरनीरन्यायेनाभेदादात्मक्लेशे तनुक्लेशस्यापि सम्भवात् तनुक्लेश इत्युक्तम्। स च विशिष्टासनकरणेनाप्रतिकर्मशरीरत्वकेशोल्लुञ्चनादिना चावसेयः। ननु परीषहेभ्यः कोऽस्य विशेषः?। उच्यते—स्वकृतक्लेशानुभवरूपस्तनुक्लेशः, परीषहास्तु स्वपरकृतक्लेशरूपा इति विशेषः।

तथा, लीनता विविक्तशय्यासनता। सा चैकान्तेनाबाधेऽसंसक्ते स्त्रीपशुपण्डकविवर्जिते शून्यागारदेवकुलसभापर्वतगुहा-

---

(१) द्वात्रिंशत् खलु कवला आहारः कुक्षिपूरको भणितः।
पुरुषस्य, महिलाया अष्टाविंशतिर्भवेयुः कवलाः॥ १॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दीनामन्यतमस्मिन् स्थानेऽवस्थानं, मनोवाक्कायकषायेन्द्रिय-संवृतता च। इति षट्प्रकारं बहिस्तपो बाह्यं तपः। बाह्यत्वं च बाह्यद्रव्यापेक्षत्वात्, परप्रत्यक्षत्वात्, कुतीर्थिकैर्गृहस्थैश्च कार्य्यत्वाच्च। अस्मात्तु षडविधादपि बाह्यात् तपस सङ्गत्यागशरीर-लाघवेन्द्रियविजय-संयमरक्षण-कर्मनिर्जरा भवन्ति॥ ८९॥

अभ्यन्तरं तप आह—

प्रायश्चित्तं वैयावृत्त्यं स्वाध्यायो विनयोऽपि च।
व्युत्सर्गोऽथ शुभं ध्यानं षोढेत्याभ्यन्तरं तपः॥९०॥

मूलोत्तरगुणेषु स्वल्पोऽप्यतीचारो निश्चितं मलिनयतीति तच्छुद्ध्यर्थं प्रायश्चित्तम्-प्रकर्षेण अयते गच्छत्यस्मादाचारधर्म इति प्रायो मुनिलोकस्तेन विचिन्त्यते स्मर्य्यतेऽतिचारविशुद्ध्यर्थमिति निरुक्तात् प्रायश्चित्तमनुष्ठानविशेषः। अथवा, प्रायो बाहुल्येन व्रतातिक्रमं चेतसि सञ्जानीते चेतश्च न पुनराचरतीत्यतः प्रायश्चित्तम्। अथवा, प्रायोऽपराध उच्यते स येन चेतति विशुध्यति तत् प्रायश्चित्तम्। भीमसेनात् पूर्वं आचार्य्याश्चितिधातुं विशुद्धावपि पठन्ति, यदाहुः—'चितो संज्ञानविशुद्धोः'।

प्रायश्चित्तं च दशविधम्—आलोचनम्, प्रतिक्रमणम्, मिश्रम्, विवेकः, व्युत्सर्गः, तपः, छेदः, मूलम्, अनवस्थाप्यता, पाराञ्चिकमिति।

तत्रालोचनं गुरोः पुरतः स्वापराधस्य प्रकटनम्। तच्चा-सेवनानुलोम्येन प्रायश्चित्तानुलोम्येन च। आसेवनानुलोम्यं येन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्रमेणातिचार आसेवितस्तेनैव क्रमेण गुरोः पुरतः प्रकटनम् । प्रायश्चित्तानुलोम्यं च गीतार्थस्य शिष्यस्य भवति । स हि पञ्चक-दशक-पञ्चदशकक्रमेण प्रायश्चित्तानि गुरुलघूपराधानुरूपाणि विज्ञाय योऽपराधो गुरुस्तं तं प्रथममालोचयति, पश्चाल्लघुं लघुतरं च ।

अतीचाराभिमुख्यपरिहारेण प्रतीपं क्रमणमपसरणं प्रतिक्रमणं मिथ्यादुष्कृतसंयुक्तेन पश्चात्तापेन 'पुनरेवं न करिष्यामि' इति प्रत्याख्यानम् ।

मिश्रमालोचनप्रतिक्रमणरूपम्, प्रागालोचनं पश्चाद् गुरुसन्दिष्टेन प्रतिक्रमणम् ।

विवेकः संसक्तान्नपानोपकरणशय्यादिविषयस्त्यागः ।

व्युत्सर्गोऽनेषणीयादिषु त्यक्तेषु गमनागमनसावद्यस्वप्नदर्शननौसन्तरणोच्चारप्रस्रवणेषु च विशिष्टप्रणिधानपूर्वकः कायवाङ्मनोव्यापारत्यागः ।

तपस्तु च्छेदग्रन्थानुसारेण जीतकल्पानुसारेण वा येन केनचित् तपसा विशुद्धिर्भवति तत् तद् देयमासेवनीयं च ।

छेदस्तपसा दुर्दमस्याहोरात्रपञ्चकादिना क्रमेण श्रमणपर्यायच्छेदनम् ।

मूलं महाव्रतानां मूलत आरोपणम् ।

तथा, अवस्थाप्यत इत्यवस्थाप्यस्तन्निषेधादनवस्थाप्यस्तस्य भावोऽनवस्थाप्यता दुष्टतरपरिणामस्याकृततपोविशेषस्य व्रतानामारोपणम्, तपः कर्म चास्योत्थाननिषदनादिकर्मकरणाशक्ति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पर्य्यन्तम्। स हि यदोत्थानाद्यपि कर्तुमशक्तस्तदाऽन्यान् प्रार्थयते— 'आर्य्याः ! उत्थातुमिच्छामि' इत्यादि। ते तु तेन सह संभाषण-मकुर्वाणास्तत्कृत्यं कुर्वन्ति, यदाह ;—

'उट्ठिज्ज निसीअज्ज व भिक्खं हिंडिज्ज मत्तगं पेहे।
कुविअपिअबंधवस्स करेइ इयरो वि तुसिणीओ ॥ १ ॥

एतावति तपसि कृते तस्योत्थापना क्रियते।

तथा, पारमन्तं प्रायश्चित्तानां, तत उत्कृष्टतरप्रायश्चित्ता-भावात्, अपराधानां वा पारमञ्चति गच्छतीत्येवंशीलं पाराञ्चि तदेव पाराञ्चिकम्। तच्च महत्यपराधे लिङ्गकुलगणसंघेभ्यो बहिष्करणम्।

एतच्च छेदपर्य्यन्तं प्रायश्चित्तं व्रणचिकित्सातुल्यं पूर्वसूरिभि-रभिहितम्। तत्र तनुरतीक्ष्णमुखो रुधिरमप्राप्तस्त्वग्लग्नः शल्यो देहादुध्रियते, न तत्र व्रणस्य मर्दनं विधीयते, शल्याल्पत्वेन व्रणस्याल्पत्वात्। द्वितीये तु लग्नोद्धृतशल्ये मर्दनं क्रियते न तु कर्णमलेन पूर्य्यते। तृतीये तु दूरतरगतशल्ये शल्योद्धार-मलनकरणमलपूरणानि क्रियन्ते। चतुर्थे तु शल्यकर्षणमर्दन-रुधिरगालनानि वेदनापहारार्थं क्रियन्ते। पञ्चमे तु गाढतरा-वगाढशल्योद्धरणं, ततो गमनादिचेष्टा निषाय्यते। षष्ठे हित-मितभोज्यभोजनोऽभोजनो वा शल्योद्धारानन्तरं भवति। सप्तमे

---

(१) उत्तिष्ठ निषीद वा भिक्षां हिण्ड मात्रकं प्रेक्षस्व।
कुपितप्रियबान्धवस्य करोतीतरोऽपि तूष्णीकस्तु ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तु शल्योद्धारानन्तरं यावच्छल्येन मांसादिदूषितं तावत् छिद्यते, गोनसभक्षितादौ पादवल्मीके वा पूर्वोक्तक्रियाभिरनुपशमाद् विसर्पति ; अङ्गच्छेदः सहास्थ्ना शेषरक्षणार्थं विधीयते। एवं द्रव्यव्रणदृष्टान्तेन मूलोत्तरगुणरूपस्य चारित्रपुरुषस्यापराधरूपो व्रण आलोचनादिना छेदान्तेन प्रायश्चित्तविधिना शोधनीयः, यदाहुर्भगवद्भद्रबाहुस्वामिपादाः ;—

[1]तणुओ अतिक्खतुंडो असोणिओ केवलं तयालग्गो।
उद्धरिउ अवउज्झइ सल्लो न मलिज्जइ वणो उ ॥ १ ॥
लग्गुद्धियम्मि बीए मलिज्जइ परं अदूरगे सल्ले।
उद्धरणमलणपूरण दूरयरगए तइयगम्मि ॥ २ ॥
मा वेयणा उ तो उद्धरित्तु गालंति सोणिअ चउत्थे।
रुज्झइ लहुं ति चेट्ठा वारिज्जइ पंचमे वणिणो ॥ ३ ॥
रोहेइ वणं छट्ठे हिअमिअभोइ अभुंजमाणो वा।
तत्तियमित्तं छिज्जइ सत्तमए पूइमंसाई ॥ ४ ॥

---

(१) तनुकोऽतीक्ष्णतुण्डोऽशोणितः केवलं त्वग्लग्नः।
उद्धृत्यापत्यज्यते शल्यो न मृद्यते व्रणस्तु ॥ १ ॥
लग्नोद्धृते द्वितीये मृद्यते परमदूरगे शल्ये।
उद्धरणमलनपूरणानि दूरतरगते तृतीयके ॥ २ ॥
मा वेदनास्तत उद्धृत्य गालयन्ति शोणितं चतुर्थे।
रुह्यते लघु इति चेष्टा वार्य्यते पञ्चमे व्रणिनः ॥ ३ ॥
रोहयति व्रणं षष्ठे हितमितभोजी अभुञ्जानो वा।
तावन्मात्रं छिद्यते सप्तमके पूतिमांसादि ॥ ४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तहविश्र अट्ठायमाणे गोणसखइयाइ रप्फए वावि ।
कीरइ तयंगछेश्रो सअट्ठिश्रो सेसरक्खट्ठा ॥ ५ ॥
मूलोत्तरगुणरूवस्स ताइणो परमचरणपुरिसस्स ।
अवराहसल्लपहवो भाववणो होइ नायव्वो ॥ ६ ॥
भिक्खायरियाइ सुज्झइ अइयारो कोइ वियडणाए उ ।
बीश्रो ह असमिश्रो मित्ति कीस सहसा अगुत्तो वा ॥ ७ ॥
सद्दाइएसु रागं दोसं च मणा गश्रो तइअगम्मि ।
नाउं अणेसणिज्जं भत्ताइविगिंचण चउत्थे ॥ ८ ॥
उस्सग्गेण वि सुज्झइ अइयारो कोइ कोइ उ तवेणं ।
तेण वि असुज्झमाणं छेयविसेसा विसोहिंति ॥ ९ ॥

प्रमाददोषव्युदासभावप्रसादनैः शल्यानवस्थाव्यावृत्तिमर्यादात्यागसंयमदार्ढ्याराधनादिप्रायश्चित्तफलम् ।

तथापि अतिष्ठति गोनसभक्षितादौ रप्फकैर्वापि ।
क्रियते तदङ्गच्छेदः सहास्थिकः शेषरक्षार्थम् ॥ ५ ॥
मूलोत्तरगुणरूपस्य तायिनः परमचरणपुरुषस्य ।
अपराधशल्यप्रभवो भावव्रणो भवति ज्ञातव्यः ॥ ६ ॥
भिक्षाचर्यादिः शुध्यत्यतिचारः कश्चिद्विकटनयैव ।
द्वितीयोऽह्यसमितोऽस्मीति किं सहसाऽगुप्तो वा ॥ ७ ॥
शब्दादिकेषु रागं द्वेषं च मनाक् गतस्तृतीयके ।
ज्ञात्वाऽनेषणीयं भक्तादिविगिञ्चना चतुर्थे ॥ ८ ॥
उत्सर्गेणापि शुध्यत्यतिचारः कश्चित् कश्चित् तु तपसा ।
तेनाप्यशुध्यमानं छेदविशेषा विशोधयन्ति ॥ ९ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ वैयावृत्त्यम्—व्यावृत्तो व्यापारप्रवृत्तः प्रवचनोदितक्रियानुष्ठानपरस्तस्य भावः कर्म वा वैयावृत्त्यम्। व्याधिपरीषहमिथ्यात्वाद्युपनिपाते तत्प्रतीकारो बाह्यद्रव्यासम्भवे स्वकायेन तदानुकूल्यानुष्ठानं च। तच्चाचार्योपाध्यायस्थविरतपस्विशैक्षग्लानसाधर्मिककुलगणसङ्घलक्षणविषयभेदेन दशधा। तत्र स्वयमाचरति परांश्चाचारयति, आचर्यते सेव्यत इति वाऽऽचार्यः। स पञ्चधाप्रव्राजकाचार्यः, दिगाचार्यः, उद्देशकाचार्यः, समुद्देशानुज्ञाचार्यः, आम्नायार्थवाचकाचार्य इति। तत्र सामायिकव्रतादेरारोपयिता प्रव्राजकाचार्यः। सचित्ताचित्तमिश्रवस्त्वनुज्ञायी दिगाचार्यः। प्रथमत एव श्रुतमुद्दिशति यः स उद्देशाचार्यः। उद्दिष्टगुर्वभावे तदेव श्रुतं समुद्दिशत्यनुजानीते वा यः स समुद्देशानुज्ञाचार्यः। आम्नायमुत्सर्गापवादलक्षणमर्थं वक्ति यः स प्रवचनार्थकथनेनानुग्राहकोऽन्यनिषद्याद्यनुज्ञायी आम्नायार्थवाचकः, आचारगोचरविषयं स्वाध्यायं वा। आचार्याल्लब्धानुज्ञाः साधव उप समीपेऽधीयतेऽस्मादित्युपाध्यायः। स्थविरो वृद्धः। स श्रुत-पर्याय-वयोभेदात् त्रिविधः। श्रुतस्थविरः समवायाङ्गं यावदध्येता, पर्यायस्थविरो यस्य दीक्षितस्य विंशत्यादीनि वर्षाणि, वयःस्थविरः सप्तत्यादिवर्षजीवितः। विकृष्टं दशमादि किञ्चिन्न्यूनषण्मासान्तं तपः कुर्वंस्तपस्वी। अचिरप्रव्रजितः शिक्षार्हः शैक्षः। रोगादिक्लिष्टशरीरो ग्लानः। साधर्मिकाः समानधर्मिणो द्वादशविधसम्भोगवन्तश्च। बहूनां गच्छानामेकजातीयानां समूहः कुलं चन्द्रादि। गच्छस्त्वेकाचार्यप्रणेयः साधु-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समूहः। कुलसमुदायो गणः कोटिकादिः। सङ्घः साधुसाध्वीश्रावकश्राविकासमुदायः। एषामाचार्यादीनामन्नपानवस्त्रपात्रप्रतिश्रयपीठफलकसंस्तारकादिभिर्धर्मसाधनैरुपग्रहः शुश्रूषा भैषजक्रिया, कान्ताररोगोपसर्गेषु परिपालनम्, एवमादि वैयावृत्त्यम्।

अथ स्वाध्यायः। सुष्ठु मर्यादया कालवेलापरिहारेण पौरुष्यपेक्षया वाऽध्ययनं स्वाध्यायः। स पञ्चविधः—वाचनम्, प्रच्छनम्, अनुप्रेक्षा, आम्नायः, धर्मोपदेशश्चेति। तत्र वाचनं शिष्याध्यापनम्। प्रच्छनं ग्रन्थार्थयोः सन्देहच्छेदाय निश्चितबलाधानाय वा परानुयोगः। अनुप्रेक्षा ग्रन्थार्थयोरेव मनसाऽभ्यासः। आम्नायो घोषविशुद्धं परिवर्तनम्, गुणनम्, रूपादानमिति यावत्। धर्मोपदेशोऽर्थोपदेशो व्याख्यानमनुयोगो वर्णनमिति यावत्।

अथ विनयः—विनीयते क्षिप्यतेऽष्टप्रकारं कर्मानेनेति विनयः। स चतुर्धा, ज्ञान-दर्शन-चारित्रोपचारभेदात्। तत्र सबहुमानं ज्ञानग्रहणाभ्यासस्मरणादि ज्ञानविनयः। सामायिकादौ लोकबिन्दुसारपर्यन्ते श्रुते भगवत्प्रकाशितपदार्थान्यथात्वासम्भवात् तत्त्वार्थश्रद्धानिःशङ्कितत्वादिना दर्शनविनयः। चारित्रवतश्चारित्रे समाहितचित्तता चारित्रविनयः। प्रत्यक्षेष्वाचार्यादिष्वभ्युत्थानाभिगमनाञ्जलिकरणादि उपचारविनयः, परोक्षेष्वपि कायवाग्मनोभिरञ्जलिक्रियागुणसंकीर्त्तनानुस्मरणादिरुपचारविनयः।

अथ व्युत्सर्गः—व्युत्सर्जनीयस्य परित्यागो व्युत्सर्गः। स द्विविधः—बाह्य आभ्यन्तरश्च। तत्र बाह्यो द्वादशादिभेदस्योपधेरतिरिक्तस्य, अनेषणीयस्य संसक्तस्य वाऽन्नपानादेर्वा त्यागः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आभ्यन्तरः कषायाणाम्, मृत्युकाले शरीरस्य च त्यागः । ननु व्युत्सर्गः प्रायश्चित्तमध्य एवोक्तस्तत् किं पुनरत्र वचनेन ? । सत्यम्, सोऽतिचारविशुद्ध्यर्थं उक्तः, अयं तु सामान्येन निर्जरार्थं इत्य-पौनरुक्त्यम् ।

अथ शुभध्यानम्—शुभमार्तरौद्रविवेकेन शुभरूपं धर्म-शुक्लरूपं ध्यानम् । अत्रार्तरौद्रध्याने उक्तपूर्वे । धर्मं शुक्लं च शुभध्याने वक्ष्येते । इत्यनेन प्रकारेण षोढाऽऽभ्यन्तरं तपः । इदं चाभ्य-न्तरस्य कर्मणस्तापकत्वात्, अभ्यन्तरैरेवान्तर्मुखैर्भगवद्भिर्ज्ञायमान-त्वाच्चाभ्यन्तरम् । ध्यानस्य सर्वेषां तपसामुपरि पाठो मोक्षसाधने-ष्वस्य प्राधान्यख्यापनार्थः, यदाह ;—

[1]संवरविणिज्जराओ मोक्खस्स पहो तवो पहो तासिं ।
ज्झाणं च पहाणंगं तवस्स तो मोक्खहेऊ तं ॥ १ ॥ ९० ॥

अथ तपसो निर्जराहेतुत्वं प्रकटयन्नाह—

दीप्यमाने तपोवह्नौ बाह्ये चाभ्यन्तरेऽपि च ।
यमी जरति कर्माणि दुर्जराण्यपि तत्क्षणात् ॥ ९१ ॥

तप एव वह्निः पापवनदाहकत्वात् तपोवह्निस्तस्मिन् दीप्य-माने प्रबलीभूते । किंविशिष्टे ? । बाह्येऽनशनादौ, आभ्यन्तरे प्रायश्चित्तादौ सति । यमी संयमवान् जरति भस्मसात् करोति । अन्तर्भूतण्यर्थत्वात् सकर्मकता । कर्माणि ज्ञानावरणीयादीनि

(१) संवरविनिर्जरे मोक्षस्य पन्थास्तपः पन्थास्तयोः ।
ध्यानं च प्रधानाङ्गं तपसस्ततो मोक्षहेतुस्तत् ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दुर्जराण्यपि दुःखक्षयाण्यपि। निर्जराहेतुत्वं तपस उपलक्षणम्, संवरहेतुत्वादप्यस्य, यदाह वाचकमुख्यः—तपसा निर्जरा च तपसा निर्जरा संवरश्च भवतीत्यर्थः। तपश्च संवरत्वादभिनव-कर्मोपचयप्रतिषेधकम्, निर्जरणफलत्वाच्चिरन्तनकर्मनिर्जरकम्, तथा च निर्वाणप्रापकमिति।

अत्रान्तरश्लोकाः—

यथा हि पिहितद्वारमुपायैः सर्वतः सरः।
नवैर्नवैर्जलापूरैः पूर्यते नैव सर्वथा॥ १॥
तथैवास्रवनिरोधेन कर्मद्रव्यैर्नवैर्नवैः।
अयं न पूर्यते जीवः संवरेण समावृतः॥ २॥
यथैव सरसस्तोयं संशुष्यति पुरा चितम्।
दिवाकरकरालातपातिसन्तापितं मुहुः॥ ३॥
तथैव पूर्वसम्बद्धं सर्वकर्म शरीरिणा।
तपसा ताप्यमानं सत् क्षयमायाति तत्क्षणात्॥ ४॥
निर्जराकरणे बाह्याच्छ्रेष्ठमाभ्यन्तरं तपः।
तत्राप्येकातपत्रत्वं ध्यानस्य मुनयो जगुः॥ ५॥
चिरार्जितानि भूयांसि प्रबलान्यपि तत्क्षणात्।
कर्माणि निर्जरन्त्येव योगिनो ध्यानशालिनः॥ ६॥
यथैवोपचितो दोषः शोषमायाति लङ्घनात्।
तथैव तपसा कर्म क्षीयते पूर्वसञ्चितम्॥ ७॥
यथा वा मेघसङ्घाताः प्रचण्डपवनैर्हताः।
हतस्ततो विशीर्यन्ते कर्माणि तपसा तथा॥ ८॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतिक्षणं सम्भवन्त्यावपि संवरनिर्जरे ।
प्रकृष्येते यदा मोक्षं प्रसुवाते तदा ध्रुवम् ॥ ९ ॥
निर्जरां निर्जरां कुर्वंस्तपोभिर्द्विविधैरपि ।
सर्वकर्मविनिर्मोक्षं मोक्षमाप्नोति शुद्धधीः ॥ १० ॥

एवं तपोभिरभितः परिचीयमाना
स्यान्निर्जरा सकलकर्मविघातहेतुः ।
सेतुर्भवोदधिसमुत्तरणे ममत्व-
व्याघातकारणमतः खलु भावयेत् ताम् ॥ ११ ॥

॥ निर्जराभावना ॥ ९१ ॥

अथ धर्मस्वाख्यातभावना—

स्वाख्यातः खलु धर्मोऽयं भगवद्भिर्जिनोत्तमैः ।
यं समालम्बमानो हि न मज्जेद् भवसागरे ॥ ९२ ॥

सुष्ठु कुतीर्थिकापेक्षया प्राधान्येन, अविधिप्रतिषेधमर्यादया ख्यातः कथितः खलु निश्चयेन धर्मो वक्ष्यमाणलक्षणः, अयं विपस्थितां चेतसि विवर्त्तमानः । कैः ? । जिनोत्तमैरवधिजिनादिभ्यः प्रकृष्टैः केवलिभिः । कथम्भूतैः ? । भगवद्भिर्व्याख्यातस्वरूपैरर्हद्भिरिति यावत् । स्वाख्याततामेवाह—यं धर्मं समालम्बमानो दुर्गतिपातभयादाश्रयन्, जन्तुरिति गम्यते, न मज्जेद् ब्रुडेद् भवसमुद्रे ॥ ९२ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वाख्यातं धर्ममाह—

संयमः सूनृतं शौचं ब्रह्माकिञ्चनता तपः ।
क्षान्तिर्मार्दवमृजुता मुक्तिश्च दशधा स तु ॥ ९३ ॥

स तु धर्मो दशधा दशप्रकारः। तत्र संयमः प्राणिदया सप्तदशविधः। तत्र पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुष्पञ्चेन्द्रियाणां मनोवाक्कायकर्मभिः करणकारणानुमतिभिश्च संरम्भसमारम्भारम्भवर्जनमिति नवधा। अजीवरूपाण्यपि पुस्तकादीनि दुःषमादोषात् प्रज्ञाबलहीनशिष्यानुग्रहार्थं यतनया प्रतिलेखनाप्रमार्जनापूर्वं धारयतोऽजीवसंयमः। तथा, प्रेक्ष्य चक्षुषा दृष्ट्वा स्थण्डिलं बीजजन्तुहरितादिरहितं, तत्र शयनासनादीनि कुर्वीतेति प्रेक्षासंयमः। गृहस्थान् सावद्यव्यापारप्रसक्तानव्यापारणेनोपेक्षमाणस्योपेक्षासंयमः। प्रेक्षितेऽपि स्थण्डिले रजोहरणादिना प्रमृज्य शयनासनादीन् कुर्वतः स्थण्डिलाच्च स्थण्डिलं संक्रामतः सचित्ताचित्तमिश्रासु पृथिवीषु रजोऽवगुण्ठितौ चरणौ प्रमार्ज्य गच्छतो वा प्रमार्जनासंयमः। भक्तपानादिकमनेषणीयं वस्त्रपात्रादिकं चानुपकारकं संसक्तं वा निर्जन्तुके स्थण्डिले परिष्ठापयतः परिष्ठापनासंयमः। मनसोऽभिद्रोहाभिमानेर्ष्यादिभ्यो निवृत्तिर्धर्मध्यानादिषु च प्रवृत्तिर्मनःसंयमः। वाचो हिंस्रपरुषादिवचोभ्यो निवृत्तिः शुभभाषायां च प्रवृत्तिर्वाक्संयमः। कायस्य धावनवल्गनादिभ्यो निवृत्तिः शुभक्रियासु च प्रवृत्तिः कायसंयम इति। एवं सप्तदशप्रकारः प्राणातिपातनिवृत्तिरूपः संयमः, यदाहुः ;—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'पुढविदगअगणिमारुयवणस्सइबितिचउपणिंदिअज्जीवे ।

पेहुप्पेहपमज्जणपरिट्ठवणमणोवईकाए ॥ १ ॥

तथा, 'ऊनण् परिहाणे' अस्य धातोः सुष्ठु ऊन्यतेऽप्रियमात्राश्रयणं मितीक्रियते इति सून्, सून् च तदृतं च सूनृतं प्रियं सत्यं च। तच्च पारुष्य पैशून्यासभ्यत्व-चापलाविलत्व-विरलत्व-संभ्रान्तत्व-सन्दिग्धत्व-ग्राम्यत्व-रागद्वेषयुक्तत्वोपधावद्यविकत्थनपरिहारेण माधुर्यौदार्यस्फुटत्वाभिजात्यपदार्थाभिव्याहाराऽर्हद्वचनानुसारार्थत्वार्थिजनभावग्राहकत्वदेशकालोपपन्नत्वयतमितहितत्वैर्युक्तं वाचनप्रच्छनप्रश्नव्याकरणादिरूपमिति मृषावादपरिहाररूपं सूनृतम् ।

शौचं संयमं प्रति निरुपलेपता। सा चादत्तादानपरिहाररूपा। लोभार्त्तो हि परधनं जिघृक्षन् संयमं मलिनयति। लौकिका अप्याहुः—

सर्वेषामेव शौचानामर्थशौचं परं स्मृतम् ।

योऽर्थेषु शुचिः स शुचिर्न मृद्वारिशुचिः शुचिः ॥१॥

अशुचिर्हि भावकल्मषसंयुक्त इहामुत्र चाशुभं कर्मोपचिनोति, उपदिश्यमानमपि च श्रेयो न प्रतिपद्यते, इत्यदत्तादानपरिहाररूपं शौचम् ।

नवब्रह्मगुप्तिसनाथमुपस्थसंयमो ब्रह्म 'भीमो भीमसेनः' इति न्यायाद् ब्रह्मचर्यं बृहत्त्वाद् ब्रह्मात्मा तत्र चरणं ब्रह्मचर्यमात्मा-

---

(१) पृथिवीदकाग्निमारुतवनस्पतिद्वित्रिचतुष्पञ्चेन्द्रियाजीवाः ।

प्रेक्ष्योपेक्ष्यप्रमार्जनपरिष्ठापनमनोवाक्कायाः ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रामतेत्यर्थः। तदर्थं गुरुकुलसेवनमपि ब्रह्मचर्यमित्यब्रह्मनिवृत्ति-रूपं ब्रह्मचर्यम्। नास्य किञ्चनं द्रव्यमस्तीत्यकिञ्चनस्तस्य भावोऽकिञ्चनता। उपलक्षणं चैतत्, तेन शरीरधर्मोपकरणादिष्वपि निर्ममत्वमकिञ्चनत्वम्। शरीरमपि धारयन्तो मुनयो निर्ममत्वात् तत् परिग्रहरहिता भोजनादिकमपि संयमयात्रार्थं शकटाक्षलेपनवत् कुर्वन्ति, न मूर्च्छया। उपकरणमपि च रजोहरणादिकं संयमरक्षार्थं वस्त्रपात्रादिकं च संयमशरीरपरित्राणार्थं धारयन्ति, न पुनर्लोभादिना इति निष्परिग्रहा एव। इति परिग्रहपरिहार-रूपाऽकिञ्चनता।

तप उक्तनिर्वचनम्, उक्तस्य संयमादेर्वक्ष्यमाणस्य क्षान्त्यादेः संवरहेतोर्धर्मस्य मध्ये पठितम्, संवरनिर्जराहेतुत्वात्। तच्च द्वादशप्रकारं पूर्वमुक्तम्। प्रकीर्णकं चेदमनेकविधम्, तद्यथा— यवमध्यं, वज्रमध्यं, चान्द्रायणे, कनकरत्नमुक्तावल्यस्तिस्रः, सिंहविक्रीडिते द्वे, सप्त सप्तमिकाद्याः प्रतिमाश्चतस्रः, सर्वतोभद्रम्, भद्रोत्तरम्, आचाम्लवर्धमानमित्येवमादि। तथा, द्वादशभिक्षुप्रतिमा मासिक्याद्या आ सप्तमासिक्याः सप्त, सप्तरात्रिक्यस्तिस्रः, अहोरात्रिकी, एकरात्रिकी च।

क्षान्तिः क्षमा शक्तस्याशक्तस्य वा सहनपरिणामः। सा च क्रोधनिमित्तस्यात्मनि भावाभावचिन्तनात्, क्रोधदोषचिन्तनात्, बालस्वभावचिन्तनात्, स्वकृतकर्मफलाभ्यागमचिन्तनात्, क्षमागुणानुप्रेक्षणाच्च। तत्र येन दोषेण मामाक्रोशति परः स दोषो मयि यद्यस्ति तदस्य सद्भूतमर्थं प्रकाशयतः कोऽपराधः ?।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ नास्ति, तर्हि मृषाऽसौ वदतीति भावाभावविचिन्तनात् क्षमितव्यमेव, यदाह —

आक्रुष्टेन मतिमता तत्त्वार्थविचारणे मतिः कार्या ।
यदि सत्यं कः कोपः स्यादनृतं किं नु कोपेन ॥ १ ॥

क्रोधदोषचिन्तनादपि क्षमितव्यमेव । क्रुद्धस्य तावद् ध्रुवं कर्मबन्धः, ततः पराभिघातः, ततोऽप्यहिंसाव्रतलोपः, क्रुद्धस्य चापवदतः सूनृतव्रतलोपः, विस्मृतप्रव्रज्याप्रतिपत्तिश्चादत्तमपि गृह्णीयात् ततोऽस्तेयव्रतलोपः, द्वेषात् परपाखण्डिनीष्वब्रह्मासेवमानस्य ब्रह्मचर्यव्रतलोपः, प्रद्विष्टस्याविरतेषु गृहस्थेषु सहायबुद्ध्या मूर्च्छापि स्यादित्यपरिग्रहव्रतलोपः । उत्तरगुणभङ्गप्रसङ्गे तु का कथा ? । क्रुद्धश्च गुरूनप्याशातयेदधिक्षिपेद् वा । इति क्रोधदोषचिन्तनम् । बालस्वभावचिन्तनाच्च क्षन्तव्यम् । बालोऽज्ञस्तत्स्वभावचिन्तनं पुनर्बालः कदाचित् परोक्षमाक्रोशति कदाचित् प्रत्यक्षम् । आक्रोशन्नपि कश्चित् ताडयति, कश्चिद् मारयति, कश्चिद् धर्मभ्रंशमपि चिकीर्षति, तद् दिष्ट्या वर्धामहे मामेष परोक्षमाक्रोशति न प्रत्यक्षम्, प्रत्यक्षं वाऽऽक्रोशति न ताडयति, ताडयति वा न मारयति, मारयति वा न धर्माद् भ्रंशयति, इत्युत्तरस्योत्तरस्याभावे लाभ एष ममेति मन्यते, यदाहुः ;—

'अक्कोसहणणमारणधम्मब्भंसाण बालसुलहाण ।
लाभं मन्नइ धीरो जहोत्तराणं अभावम्मि ॥ १ ॥

---

(१) आक्रोशहननमारणधर्मभ्रंशानां बालसुलभानाम् ।
लाभं मन्यते धीरो यथोत्तराणामभावे ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति बालस्वभावचिन्तनम्। स्वकृतकर्मफलाभ्यागमचिन्तना-दपि क्षन्तव्यमेव। पूर्वकृतकर्मणां फलाभ्यागम एषः, फलभोगं तपो वा विना न निकाचितस्य कर्मणः क्षय इत्यवश्यभोक्तव्ये फले निमित्तमात्रमेव परः, यदाह ;—

[1]सव्वो पुव्वकयाणं कम्माणं पावफलविवागो।
अवराहेसु गुणेसु अ निमित्तमित्तं परो होइ॥ १॥

इति स्वकृतकर्मफलाभ्यागमचिन्तनम्। क्षमागुणानुप्रेक्ष-णाच्च क्षन्तव्यम्—अनायासः क्रोधनिमित्तप्रायश्चित्ताभावः, शुभ-ध्यानाध्यवसायः, परसमाधानोत्पादनम्, स्तिमितप्रसन्नान्तरात्म-त्वम्, प्रहरणसहायान्वेषणाभावः, असंरम्भः, प्रसन्नमुखता, धवल-विलोचनता, अस्वेदता, निष्कम्पता, परप्रहारवेदनाऽभाव इति क्षमागुणाः। इति क्रोधविपक्षः क्षमाधर्मः।

अथ मार्दवम्—मृदुरस्तब्धस्तस्य भावः कर्म वा मार्दवं नीचै-र्वृत्तिरनुत्सेकश्च, तदुभयमपि मदनिग्रहाद् भवति। मदाश्च जाति-मदादयः पूर्वमुक्ताः। ततश्च जातिकुलरूपबललाभबुद्धिवाल्लभ्यक-श्रुतमदान्धाः क्लीबाः परत्र चेह च हितमप्यर्थं न पश्यन्तीत्यादि-मददोषपरिहारहेतुर्मानप्रतिपक्षो मार्दवम्।

अथ ऋजुता—ऋजुरवक्रमनोवाक्कायकर्मा तस्य भावः

---

(१) सर्वः पूर्वकृतानां कर्मणां पापफलविपाकः।
अपराधेषु गुणेषु च निमित्तमात्रं परो भवति॥ १॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कर्म वा ऋजुता मनोवाक्कायविक्रियाविरह इत्यर्थः, माया-रहितत्वमिति यावत्। मायावी हि सर्वातिसन्धानपरतया सर्वाभिशङ्कनीयो भवति, यदाहः—

मायाशीलः पुरुषो यद्यपि न करोति कञ्चिदपराधम्।
सर्प इवाविश्वास्यो भवति तथा ह्यात्मदोषहतः॥ १॥

इति मायाप्रतिपक्षभूता ऋजुता।

अथ मुक्तिः—सा च बाह्याभ्यन्तरवस्तुषु तृष्णाविच्छेदरूपा लोभाभाव इत्यर्थः। लोभाभिभूतो हि क्रोध-मान-माया-हिंसा-ऽनृत-स्तेया-ऽब्रह्म-परिग्रहदोषजालेनोपचीयते, यदाह :—

सर्वविनाशाश्रयिणः सर्वव्यसनैकराजमार्गस्य।
लोभस्य को मुखगतः क्षणमपि दुःखान्तरमुपेयात्! ॥ १॥

इति लोभपरिहाररूपा निर्भयत्व-स्वपरहितात्मप्रवृत्तिमत्त्व-ममत्वाभाव-निस्सङ्गता-ऽपरद्रोहकत्वादिगुणयुक्ता रजोहरणादि-केष्वप्युपकरणेष्वनभिष्वङ्गस्वभावा मुक्तिः। इति दशविधो धर्मः। ननु संयम-सूनृतशौच-ब्रह्मा-ऽकिञ्चनतानां महाव्रतेषु, क्षमा-मार्दवार्जवमुक्तीनां संवरप्रकरणे, तपसश्च संवर-निर्जराहेतुत्वे-नोक्तत्वाद् धर्मप्रतिपादनप्रकरणे पुनरुक्तत्वमेव। उच्यते—नात्र संयमादीनां पुनर्भणनं प्रक्रान्तम्, किन्तु संयमादिदशविधधर्म-प्रतिपादनप्रकारेण भगवतामर्हतां स्वाख्यातधर्मत्वानुप्रेक्षणमेव, इति धर्माणां गुणभावेन तदाख्यातॄणां भगवतामनुप्रेक्षानिमित्तं स्तुतिरिति सर्वं समञ्जसम्॥ ९२॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथास्य धर्मस्य माहात्म्यमाह—

धर्मप्रभावतः कल्पद्रुमाद्या ददतीप्सितम् ।
गोचरेऽपि न ते यत्स्युरधर्माधिष्ठितात्मनाम् ॥ ९४ ॥

कल्पद्रुमः कल्पवृक्षः, आदिशब्दाच्चिन्तामण्यादयः परिगृह्यन्ते, ते वनस्पतिरूपा उपलरूपाश्च धर्मवद्भ्यः सुषमादिकालभाविभ्यो ऽभीष्टफलदायिनो भवन्ति । ते एव धर्महीनानां दुःषमादिकाल-भाविनाम्, आस्तामभीष्टं न ददति, गोचरेऽपि न भवन्ति । अत्रार्थप्राप्तिः फलम् ॥ ९४ ॥

तथा—

अपारे व्यसनाम्भोधौ पतन्तं पाति देहिनम् ।
सदा सविधवर्त्येकबन्धुर्धर्मोऽतिवत्सलः ॥ ९५ ॥

स्पष्टः । अत्रानर्थपरिहारः फलम् ॥ ९५ ॥

तथा—

आप्लावयति नाम्भोधिराश्वासयति चाम्बुदः ।
यन्महीं, स प्रभावोऽयं ध्रुवं धर्मस्य केवलः ॥ ९६ ॥

अत्रानर्थपरिहारोऽर्थप्राप्तिश्च फलम् ॥ ९६ ॥

इदानीं साधारणधर्मस्य साधारणं फलमाह—

न ज्वलत्यनलस्तिर्यग् यदूर्ध्वं वाति नानिलः ।
अचिन्त्यमहिमा तत्र धर्म एव निबन्धनम् ॥ ९७ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्पष्टः । मिथ्यादृशोऽप्याहुः ;—अग्नेरूर्ध्वज्वलनम्, वायोस्तिर्यक् पवनमदृष्टकारितम् इति ॥ ९७ ॥

तथा—

निरालम्बा निराधारा विश्वाधारो वसुन्धरा ।
यच्चावतिष्ठते तत्र धर्मादन्यद् न कारणम् ॥ ९८ ॥

निरालम्बा आलम्बनस्य रज्ज्वादेरभावात्, निराधारा आधारस्य शेषकूर्मवराहदिक्कुञ्जरादेः प्रमाणानुपपन्नत्वेनाभावात्, विश्वस्य चराचरभेदस्य जगत आधारः, वसुन्धरा पृथ्वी यदवतिष्ठते नाधः पतति, तत्र धर्मादन्यद् न कारणम्, अन्वयव्यतिरेकाभ्यामन्यस्य कस्यचिदवस्थानहेतोरभावात् ॥ ९८ ॥

तथा—

सूर्याचन्द्रमसावेतौ विश्वोपकृतिहेतवे ।
उदयेते जगत्यस्मिन् नूनं धर्मस्य शासनात् ॥ ९९ ॥

स्पष्टः ॥ ९९ ॥

अबन्धूनामसौ बन्धूरसखीनामसौ सखा ।
अनाथानामसौ नाथो धर्मो विश्वैकवत्सलः ॥ १०० ॥

अबन्धूनां बन्धुरहितानामसौ धर्मो बन्धुः, बन्धुकार्यस्य विपदुत्तारणादेः करणात् ; असखीनां मित्ररहितानामसौ सखा, प्रीत्युत्पादकत्वात् ; अनाथानामस्वामिकानामसौ नाथः, योगक्षेमकारित्वात्, यदाह—योगक्षेमकृद् नाथः इति । अत्र

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हेतुर्विश्वैकवत्सलः—वत्सं लाति स्नेहेनादत्ते वत्सला गौस्तद्वत् सकलजगत्प्रीतिहेतुत्वाद् धर्मोऽपि वत्सलः ॥ १०० ॥

इदानीमनर्थनिवृत्तेः प्राकृतैरप्याकाङ्क्ष्यमाणत्वाद् धर्मफलमाह—

रक्षोयक्षोरगव्याघ्रव्यालानलगरादयः ।
नापकर्तुमलं तेषां यैर्धर्मः शरणं श्रितः ॥ १०१ ॥

स्पष्टः ॥ १०१ ॥

इदानीं प्रधानभूतामनर्थनिवृत्तिमर्थप्राप्तिं च धर्मस्य फलमाह—

धर्मो नरकपातालपातादवति देहिनः ।
धर्मो निरुपमं यच्छत्यपि सर्वज्ञवैभवम् ॥१०२॥

नरकपातरक्षणलक्षणा अनर्थनिवृत्तिः सर्वज्ञवैभवप्राप्तिश्चार्थप्राप्तिप्रधानभूता धर्मस्य फलम्, शेषं त्वानुषङ्गिकमुक्तमिति ।

अत्रान्तरश्लोकाः—

अयं दशविधो धर्मो मिथ्यादृग्भिर्न वीक्षितः ।
योऽपि कश्चित् क्वचित् प्रोचे सोऽपि वाङ्मात्रवर्णनम् ॥ १ ॥
तत्त्वार्थो वाचि सर्वेषां केषाञ्चन मनस्यपि ।
क्रिययापि नरीनर्त्ति नित्यं जिनमतस्पृशाम् ॥ २ ॥
वेदशास्त्रपराधीनबुद्धयः सूत्रकण्ठकाः ।
न लेशमपि जानन्ति धर्मरत्नस्य तत्त्वतः ॥ ३ ॥
गोमेधनरमेधाश्वमेधाद्यध्वरकारिणाम् ।
याज्ञिकानां कुतो धर्मः प्राणिघातविधायिनाम् ? ॥ ४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अश्रद्धेयमसद्भूतं परस्परविरोधि च ।
वस्तु प्रलपतां धर्मः कः पुराणविधायिनाम् ? ॥ ५ ॥
असद्भूतव्यवस्थाभिः परद्रव्यं जिघृक्षताम् ।
मृत्पानीयादिभिः शौचं स्मार्तादीनां कुतो ननु ? ॥ ६ ॥
ऋतुकाले व्यतिक्रान्ते भ्रूणहत्याविधायिनाम् ।
ब्राह्मणानां कुतो ब्रह्म ब्रह्मचर्यापलापिनाम् ? ॥ ७ ॥
अदित्सतोऽपि सर्वस्वं यजमानाज्जिघृक्षताम् ।
अर्थार्थं त्यजतां प्राणान् क्वाकिञ्चन्यं द्विजन्मनाम् ? ॥ ८ ॥
दिवसे च रजन्यां च सुखमापृच्छ्य भक्षताम् ।
भक्ष्याभक्ष्याविवेकानां सौगतानां कुतस्तपः ? ॥ ९ ॥
मृद्वी शय्या प्रातः पेया मध्ये भक्तं सायं पानम् ।
द्राक्षाखण्डं रात्रेर्मध्ये शाक्योपज्ञः साधुधर्मः ! ॥ १० ॥
स्वल्पेष्वप्यपराधेषु क्षणात् शापं प्रयच्छताम् ।
लौकिकानामृषीणां न क्षमालेशोऽपि दृश्यते ॥ ११ ॥
जात्यादिमदर्दुर्वृत्तपरिनर्तितचेतसाम् ।
क्व मार्दवं द्विजातीनां चतुराश्रमवर्तिनाम् ॥ १२ ॥
दम्भसंरम्भगर्भाणां बकवृत्तिजुषां बहिः ।
भवेदार्जवलेशोऽपि पाखण्डव्रतिनां कथम् ? ॥ १३ ॥
गृहिणीगृहपुत्रादिपरिग्रहवतां सदा ।
द्विजन्मनां कथं मुक्तिर्लोभैककुलवेश्मनाम् ? ॥ १४ ॥
अरक्तद्विष्टमूढानां केवलज्ञानशालिनाम् ।
ततो भगवतामेषा धर्मस्वाख्याततार्हताम् ॥ १५ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रागाद् द्वेषात् तथा मोहाद् भवेद् वितथवादिता ।
तदभावे कथं नामार्हतां वितथवादिता ? ॥ १६ ॥
ये तु रागादिभिर्दोषैः कलुषीकृतचेतसः ।
न तेषां सूनृता वाचः प्रसरन्ति कदाचन ॥ १७ ॥
तथाहि यागहोमादिकर्माणीष्टानि कुर्वताम् ।
वापीकूपतडागादिन्यपि पूर्तान्यनेकशः ॥ १८ ॥
पशूपघाततः स्वर्गलोकसौख्यं विमार्गताम् ।
द्विजेभ्यो भोजनैर्दत्तैः पितृतृप्तिं चिकीर्षताम् ॥ १९ ॥
घृतयोन्यादिकरणैः प्रायश्चित्तविधायिनाम् ।
पञ्चस्वापत्सु नारीणां पुनरुद्वाहकारिणाम् ॥ २० ॥
अपत्यासम्भवे स्त्रीषु क्षेत्रजापत्यवादिनाम् ।
सदोषाणामपि स्त्रीणां रजसा शुद्धिवादिनाम् ॥ २१ ॥
श्रेयोबुद्धयाऽध्वरहतच्छागशिश्नोपजीविनाम् ।
सौत्रामण्यासमतन्त्रौ सीधुपानविधायिनाम् ॥ २२ ॥
गूथाशिनीनां च गवां स्पर्शतः पूतमानिनाम् ।
जलादिस्नानमात्रेण पापशुद्धयभिधायिनाम् ॥ २३ ॥
वटाश्वत्थामलक्यादिद्रुमपूजाविधायिनाम् ।
वह्नौ हुतेन हव्येन देवप्रीणनमानिनाम् ॥ २४ ॥
भुवि गोदोहकरणाद् रिष्टशान्तिकमानिनाम् ।
योषिद्विडम्बनाप्रायव्रतधर्मोपदेशिनाम् ॥ २५ ॥
तथा—जटापटलभस्माङ्गरागकौपीनधारिणाम् ।
अर्कधत्तूरमालूरैर्देवपूजाविधायिनाम् ॥ २६ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुर्वतां गीतनृत्यादि पुतौ वादयतां मुहुः ।
मुहुर्वदननादेनातोद्यनादविधायिनाम् ॥ २७ ॥
असत्यभाषापूर्व्वं च मुनीन् देवान् जनान् घ्नताम् ।
विधाय व्रतभङ्गं च दासीदासत्वमिच्छताम् ॥ २८ ॥
गृह्णतां मुञ्चतां भूयो भूयः पाशुपतं व्रतम् ।
भेषजादिप्रयोगेण यूकालिक्षं प्रणिघ्नताम् ॥ २९ ॥
नरास्थिभूषणभृतां शूलखट्वाङ्गवाहिनाम् ।
कपालभाजनभुजां घण्टानुपूरधारिणाम् ॥ ३० ॥
मद्यमांसाङ्गनाभोगप्रसक्तानां निरन्तरम् ।
पुतानुबद्धघण्टानां गायतां नृत्यतां मुहुः ॥ ३१ ॥

तथा—

अनन्तकायकन्दादिफलमूलदलाशिनाम् ।
कलत्रपुत्रयुक्तानां वनवासजुषामपि ॥ ३२ ॥

तथा—

भक्ष्याभक्ष्ये पेयापेये गम्यागम्ये समात्मनाम् ।
योगिनाम्ना प्रसिद्धानां कौलाचार्यान्तवासिनाम् ॥ ३३ ॥
अन्येषामपि जैनेन्द्रशासनास्पृष्टचेतसाम् ।
क्व धर्मः क्व फलं तस्य तस्य स्वाख्यातता कथम् ? ॥ ३४ ॥
जिनेन्द्रस्यापि धर्मस्य यदत्रामुत्र वा फलम् ।
आनुषङ्गिकमेवेदं मुख्यं मोक्षं प्रचक्षते ॥ ३५ ॥
सस्यहेतौ कृषौ यद्वत् पलालाद्यानुषङ्गिकम् ।
अपवर्गफले धर्मे तद्वत् सांसारिकं फलम् ॥ ३६ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वाख्याततामिति जिनाधिपतिप्रणीत-
धर्मास्थितामसकृदेव विभावयन्तः ।
मुक्ता ममत्वविषवेगविकारदोषैः
साम्यं प्रकर्षपदवीं परमां नयन्ति ॥ ३७ ॥

धर्मस्वाख्याततावना ॥ १०२ ॥

अथ लोकभावनामाह—

कटिस्थकरवैशाखस्थानकस्थनराकृतिम् ।
द्रव्यैः पूर्णं स्मरेल्लोकं स्थित्युत्पत्तिव्ययात्मकैः ॥१०३॥

कटिः श्रोणिस्तत्र तिष्ठत इति कटिस्थौ करौ यस्यासौ कटिस्थकरः, वैशाखं प्रसारितपादं तच्च तत् स्थानकं च तत्र तिष्ठति तत्स्थः, स चासौ नरश्च, तद्वदाकृतिर्यस्य तं लोकमाकाश-क्षेत्रं चतुर्दशरज्जुप्रमाणं स्मरेदनुप्रेक्षेत । किं विशिष्टम् ? । द्रव्यै-र्धर्माधर्मकालजीवपुद्गलैः पूर्णम्, किं विशिष्टैर्द्रव्यैः ? स्थित्युत्पत्ति-व्ययात्मकैः स्थितिर्ध्रौव्यम्, उत्पत्तिरुत्पादः, व्ययो विनाशस्ते आत्मानः स्वरूपं येषां तानि तथा । सर्वमपि हि वस्तु स्थित्यु-त्पादव्ययात्मकम्, यदाह ;—"उत्पादव्ययध्रौव्ययुक्तं सत्" । आकाशादयोऽपि हि नित्यानित्यत्वेन प्रसिद्धाः प्रतिक्षणं तेन तेन पर्यायेणोत्पद्यन्ते विपद्यन्ते च । प्रदीपादयोऽप्युत्पादविनाश-योगिनोऽवतिष्ठन्ते, न पुनरैकान्तिकस्थितियोगि उत्पादविनाश-योगि वा किञ्चिदस्ति, यदवोचाम ;—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आदीपमाव्योम समस्वभावं स्याद्वादमुद्रानतिभेदि वस्तु।
तन्नित्यमेवैकमनित्यमन्यदिति त्वदाज्ञाद्विषतां प्रलापाः ॥ १॥

इति ॥ १०३ ॥

लोकस्वरूपमेवाह—

लोको जगत्त्रयाकीर्णो भुवः सप्तात्र वेष्टिताः।
घनाम्भोधिमहावाततनुवातैर्महाबलैः ॥१०४॥

लोक उक्तस्वरूपो जगतां लोकदेशानां त्रयेणाधस्तिर्यगूर्ध्व-रूपेणाकीर्णो व्याप्तः, वदन्ति हि 'अधोलोकः, तिर्यग्लोकः, ऊर्ध्वलोकः' इति। तत्र लोके सप्तसंख्या भुवः पृथिव्यो रत्नप्रभा-शर्कराप्रभा-वालुकाप्रभा-पङ्कप्रभा धूमप्रभा-तमःप्रभा-महातमःप्रभा यथार्थाभिधानाः, अनादिकालप्रसिद्धाऽनन्वर्थसंज्ञाश्च, तद्यथा— घर्मा, वंशा, शैला, अञ्जना, अरिष्टा, माघव्या, माघवी च। ततश्च प्रत्येकं रत्नप्रभाया अधोऽधः पृथुतराः। तासु त्रिंशत्, पञ्चविंशतिः, पञ्चदश, दश, त्रीण्येकं पञ्चोनं नरकावासशत-सहस्रं, पञ्चैव नारकावासा यथाक्रमम्। ताश्च वेष्टिताः परिवृता अधः पार्श्वतश्च। कैः?। घनो निबिडो न तु द्रवो यो-ऽसावम्भोधिः, महांश्चासौ वातश्च महावातो घनवातः, तनु-श्चासौ वातश्च तनुवातः, तैः। किं विशिष्टैः?। महाबलैः पृथ्वीधारणसमर्थैः।

तत्र सर्वासां पृथिवीनामधो घनोदधयः मध्योत्सेधे विंशति-योजनसहस्राणि, महावाताः उत्सेधे घनोदधितोऽसंख्यानि योजन-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सहस्राणि, तनुवाताश्च महावातेभ्योऽसंख्यानि योजनसहस्राणि, ततोऽप्यसंख्येयानि योजनसहस्राण्याकाशम्। एतच्च मध्ये उत्सेध-मानम्। ततः परं क्रमेण हीयमानं प्रान्ते वलयतुल्यमानमिति। घनोदधिवलयविष्कम्भमानं रत्नप्रभायाः षड्योजनानि, घनवात-वलयविष्कम्भमानमर्धपञ्चमयोजनानि, तनुवातवलयविष्कम्भमानं सार्धं योजनम्। रत्नप्रभावलयमानादुपरि योजनत्रिभागो घनो-दधौ, घनवाते गव्यूतम्, तनुवाते च गव्यूतत्रिभागो वर्त्तते। एतच्छर्कराप्रभायां वलयमानम्। एवं शर्कराप्रभावलयमाना-दुपर्ययमेव प्रक्षेपः। एवं पूर्वपूर्ववलयमानादुपर्ययमेव प्रक्षेपः सप्तमपृथिवीं यावत्, यदाह ;—

[1]तिभागो गाउयं चेव तिभागो गाउयस्स य।
आइधुवे पक्खेवो अहो अहो जाव सत्तमिआ॥ १॥

प्रक्षेपे सति वलयविष्कम्भमानमाभ्यो गाथाभ्योऽवसेयम्, तद्यथा—

[2]छस्सतिभाग पउणा य पंच वलयाण जोअणपरिमाणं।
एगं बारसभागा सत्त कमा बीयपुढवीए॥ १॥

---

(१) त्रिभागो गव्यूतं चैव त्रिभागो गव्यूतस्य च।
आदिध्रुवे प्रक्षेपोऽधोऽधो यावत् सप्तमीम्॥ १॥

(२) षट्कत्रिभागः प्रनूनाश्च पञ्च वलयानां योजनपरिमाणम्।
एकं द्वादशभागाः सप्त क्रमेण द्वितीयपृथिव्याम्॥ १॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

[1]जोअणसत्ततिभागोण पंच एगं च वलयपरिमाणं ।
बारसभागा अट्ठ उ तइयाइ जहक्कमं नेयं ॥ २ ॥
सत्त सवाया पंच उ पउणा दो जोअणा चउत्थीए ।
घणउअहिमाइयाणं वलयाणं माणमेयं तु ॥ ३ ॥
सतिभागसत्त तह अद्धछट्ठ वलयाण माणमेयं तु ।
जोअणमेगं बारसभागा दस पंचमीए तहा ॥ ४ ॥
अट्ठं तिभागोणाइं पउणाइ छच्च वलयमाणं तु ।
छट्ठीए जोअणं तहा बारसभागा य एक्कारा ॥ ५ ॥
अट्ठ य छच्चि य दु च्चिय घणोअहीमाइआण माणं तु ।
सत्तममहीए नेयं जहासंखेण तिण्हं पि ॥ ६ ॥

एतानि च वलयानि पृथिव्याधारभूतघनोदध्यादिभ्यः पृथिवीपर्यन्तपरिधिप्रान्तेषु वलयाकारतया एतावद्विष्कम्भाणि पृथिव्युत्सेधसमोत्सेधानि च ॥ १०४ ॥

---

(१) योजनसप्ततिभागोनं पञ्चैकं च वलयपरिमाणम् ।
द्वादशभागा अष्ट तु तृतीयायां यथाक्रमं नेयम् ॥ २ ॥
सप्त सपादाः पञ्च तु प्रन्यूने द्वे योजने चतुर्थ्याम् ।
घनोदध्यादिकानां वलयानां मानमेतत्तु ॥ ३ ॥
सत्रिभागसप्त तथा अर्धषष्ठं वलयानां मानमेतत्तु ।
योजनमेकं द्वादशभागा दश पञ्चम्यां तथा ॥ ४ ॥
अष्ट त्रिभागोनानि प्रन्यूनानि षट् च वलयमानं तु ।
षष्ठ्यां योजनं तथा द्वादशभागाश्चैकादश ॥ ५ ॥
अष्ट च षट् चैव द्वौ चैव घनोदध्यादिकानां मानं तु ।
सप्तममह्यां नेयं यथासंख्येन त्रयाणामपि ॥ ६ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुनर्लोकस्वरूपमाह —

वेत्रासनसमोऽधस्तान्मध्यतो झल्लरीनिभः ।

अग्रे मुरजसङ्काशो लोकः स्यादेवमाकृतिः ॥ १०५ ॥

अधस्तादधोभागे वेत्रासनमधस्ताद् विस्तीर्णमुपर्युपरि सङ्कोचवत् तत्समस्तदाकारः, मध्यतो मध्ये झल्लरीवाद्यविशेषस्तत्सदृशः, अग्रे मध्यलोकादुपरि मुरज ऊर्ध्वमधश्च संकुचितो मध्यभागे विस्तृतो वाद्यविशेषस्तत्सदृशः। एवमधोमध्योर्ध्वेषु आकारत्रययोगी लोकः, यदाहुः—

तत्राधोमुखमल्लकसंस्थानं वर्णयन्त्यधोलोकम् ।

स्थालमिव च तिर्यग्लोकमूर्ध्वमथ मल्लकसमुद्गम् ॥ १ ॥

इह चाधस्तिर्यगूर्ध्वलोका रुचकापेक्षया। रुचकश्च मेरुमध्यगोस्तनाकारचतुराकाशप्रदेशप्रमाणोऽधः, तादृश एवोर्ध्वम्, एवमष्टप्रदेशः, यदाहुः—

[1]अट्ठपएसो रुअगो तिरियलोगस्स मज्झयारम्मि ।

एस पहवो दिसाणं एसेव भवे अणुदिसाणं ॥ १ ॥

तत्र रुचकादध उपरि च नव नव योजनशतानि तिर्यग्लोक इत्युत्सेधेऽष्टादशयोजनशतप्रमाणः, तिर्यग्लोकादधो नवयोजनशतोनसप्तरज्जुप्रमाणोऽधोलोकः। तत्र सप्त पृथिव्य उक्तरूपाः। तत्र रत्नप्रभायां पृथिव्यामशीतिसहस्राधिकयोजनलक्षबाहल्याया-

---

(१) अष्टप्रदेशो रुचकस्तिर्यग्लोकस्य मध्यकारे ।
एष प्रभवो दिशानामेष एव भवेदनुदिशानाम् ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुपर्यधश्च योजनसहस्रं मुक्त्वा मध्येऽष्टसप्ततिसहस्राधिके योजनलक्षे भवनपतीनां भवनानि। ते चासुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमाराः। ते च चूडामणिफणिवज्रगरुडघटाश्ववर्धमानमकरसिंहहस्तिचिह्नाः। तत्र भवनपतयो दक्षिणोत्तरदिग्व्यवस्थिताः। तत्रासुरकुमाराणां द्वाविन्द्रौ चमरो बलिश्च। नागकुमाराणां धरणो भूतानन्दश्च। विद्युत्कुमाराणां हरिर्हरिसहश्च। सुपर्णकुमाराणां वेणुदेवो वेणुदालिश्च। अग्निकुमाराणामग्निशिखोऽग्निमाणवश्च। वातकुमाराणां वेलम्बः प्रभञ्जनश्च। स्तनितकुमाराणां सुघोषो महाघोषश्च। उदधिकुमाराणां जलकान्तो जलप्रभश्च द्वीपकुमाराणां पूर्णो वशिष्ठश्च। दिक्कुमाराणाममितो मितवाहनश्च। अस्यामेव रत्नप्रभायामुपरितनयोजनसहस्रस्याध उपरि च योजनशतमुक्त्वा मध्येऽष्टासु योजनशतेष्वष्टविधानां पिशाचभूतयक्षराक्षसकिन्नरकिम्पुरुषमहोरगगन्धर्वाणां कदम्बवृक्षसुलसवृक्षवटवृक्षखट्वाङ्गाशोकवृक्षचम्पकवृक्षनागवृक्षतुम्बरुवृक्षचिह्नानां तिर्यग्लोकवासिनां व्यन्तराणां नगराणि। तेष्वपि दक्षिणोत्तरदिग्व्यवस्थितेषु द्वौ द्वाविन्द्रौ। तत्र पिशाचानामिन्द्रौ कालो महाकालश्च। भूतानां सुरूपः प्रतिरूपश्च। यक्षाणां पूर्णभद्रो माणिभद्रश्च। राक्षसानां भीमो महाभीमश्च। किन्नराणां किन्नरः किंपुरुषश्च। किंपुरुषाणां सत्पुरुषो महापुरुषश्च। महोरगाणामतिकायो महाकायश्च। गन्धर्वाणां गीतरतिर्गीतयशाश्च।

रत्नप्रभायामेव प्रथमस्य शतस्याध उप[illegible]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योजनानि मुक्त्वा सर्व्वऽशीतौ योजनेषु अणपन्निअ-पणपन्निअप्रभृतयस्तथैव दक्षिणोत्तरव्यवस्थिता अष्टौ व्यन्तरनिकायाः, तथैव द्वौ द्वाविन्द्रौ ।

तथा, रत्नप्रभायाः पृथिव्याः समतलादुपरि सप्तसु नवत्यधिकेषु योजनशतेषु ज्योतिषामधस्तलप्रदेशः, तदुपरि दशयोजनेषु सूर्यः, तदुपर्यशीतियोजनेषु चन्द्रः, तदुपरि विंशतियोजनेषु तारा ग्रहाश्च । एवमयं ज्योतिर्लोको दशोत्तरं योजनशतं बाहल्येन । एकादशभिर्योजनशतैरेकविंशत्युत्तरैर्जम्बूद्वीपकमेरुमस्पृशन् सर्वासु दिक्षु मण्डलिकया व्यवस्थितं ज्योतिश्चक्रं ध्रुववर्जं भ्राम्यति, लोकान्तं च एकादशभिर्योजनशतैरेकादशोत्तरैरस्पृशन् मण्डलिकया तिष्ठति, यदाह ; –

[1]एक्कारसेक्कवीसा सयमेक्कारहिआ य एक्कारा ।
मेरु अलोगा बाहं जोइसचक्कं चरइ ठाइ ॥ १ ॥

अत्र सर्वोपरि किल स्वातिनक्षत्रम्, सर्वेषामधो भरणिनक्षत्रम्, सर्वदक्षिणो मूलः, सर्वोत्तरश्चाभीचिः । तत्र जम्बूद्वीपे द्वौ चन्द्रौ द्वौ सूर्यौ । लवणसमुद्रे चत्वारश्चन्द्राः सूर्याश्च । धातकीखण्डे द्वादशचन्द्राः सूर्याश्च । कालोदे द्विचत्वारिंशच्चन्द्राः सूर्याश्च । पुष्करवरार्धे द्वासप्ततिश्चन्द्राः सूर्याश्च । इत्येवं मनुष्यलोके द्वात्रिंशं चन्द्रशतं सूर्यशतं च भवति । अष्टाशीतिर्ग्रहाः, अष्टाविंशति-

---

(१) अष्टप्रदे॰ -विंशतिः शतान्येकादशाधिकाश्चैकादश ।
एष प्रभवो द्विश॰ ॰र्बहिर्ज्योतिश्चक्रं चरति तिष्ठति ॥ १ ॥